**अभिनव** *a.* [आधिक्येन नवः, भृशार्थे अभिरत्र] 1 (*a*) Quite new or fresh (in all senses); पदपङ्क्तिर्दृश्यतेऽभिनवा Ś. 3. 7; 5. 1; °कण्ठशोणित 6. 27; Me. 100; R. 9. 29; °वा वधूः K. 2 newly married. (*b*) Quite young or fresh, blooming, youthful (as body, age &c.); वपुरभिनवमस्याः पुष्यति स्वां न शोभाम् Ś. 1. 19; U. 5. 12; the younger; °शाकटायनः; °भोजः &c. (*c*) Fresh, recent. -2 Very young, not having experience. -वः [अभिनु अप्] Praise to win over, flattery. -**Comp.** -**उद्भिद्** -**दः** a new shoot or bud. -**कालिदासः** The modern Kālidāsa, i. e. Mādhavāchārya. -**गुप्तः** N. of a well-known author. -**चन्द्रार्घविधिः** 1 a ceremony performed at the time of the new moon. -2 N. of the 114th chapter in the Bhaviṣya Purāna. - **तामरसम्** 1 a fresh-blown lotus. -2 a kind of metre. -**यौवन, -वयस्क** *a.* youthful, very young. -**वैयाकरणः** one who has newly begun his study of grammar.

**अभिनह्** 4 P. To bind up (as the eyes), to bind, tie, fasten; स्तनयोः समयेन याङ्गनानामभिनद्धारसमा न सा रसेन। परिरम्भरुचि ततिर्जलानामभिनद्धा रसमानसारसेन॥ Śi. 6. 75.

**अभिनहनम्** 1 A bandage (over the eyes); तस्य यथाभिनहनं प्रमुच्य प्रब्रूयात् Chān. Up. 6. 14. 2. -2 a blind.

**अभिनिधन** *a.* [अभिगतो निधनं मरणम्] About to perish, approaching one's doom. -**नम्** N. of certain verses of the Sāmaveda repeated at this time.

**अभिनिधानम्** 1 Putting on, setting up. -2 Euphonic suppression, weakening in the pronunciation of words, especially the supression of an initial अ after ए or ओ; cf. अवग्रह.

**अभिनियुक्त** *a.* Occupied in, busy.

**अभिनियोगः** Close application, attention or intentness, absorption; कार्य° Mu. 1.

**अभिनिर्मुक्त** *a.* 1 Left or quitted (by the sun when it sets). -2 One asleep at sunset and thus not doing the duties to be then performed. सूर्येणाभ्युदितो यश्च ब्रह्मचारी भवत्युत। तथा सूर्याभिनिर्मुक्तः कुनखी श्यावदन्नपि॥ Mb. 12. 34.3.

**अभिनिर्याणम्** 1 A march. -2 Invasion, marching against an enemy.

**अभिनिर्वृत्तिः** *f.* Accomplishment, completion. यस्य ह्यर्थाभिनिर्वृत्तौ स भवन्त्याभ्ययिताः परे Mb. 5. 134. 10.

**अभिनिवर्तः** Turning towards, turning again and again.

**अभिनिविश्** 6 A. अभिनिविशश्च (P. I. 4. 47) 1 (*a*) To enter into, be settled in; to occupy, set foot in. (*b*) To take possession of, resort to, be attached to (with acc.); अभिनिविशते सन्मार्गम् Sk. takes to, follows, a good path; सैव धन्या गणिकादारिका यामेवं भवन्मनोऽभिनिविशते Dk. 57, Mu. 5. 12, Bk. 8. 80. -*Caus.* To make one enter or occupy, lead, carry or conduct to; (fig.) apply, direct or turn (as mind, heart &c.) towards something; प्रतिबन्धवत्स्वपि विषयेषु अभिनिवेश्य M. 3, Śi. 1. 15.

**अभिनिविष्ट** *p. p.* 1 Intent on, engrossed in, engaged in or occupied with, applying oneself to; माधवापकारं प्रति अभिनिविष्टा भवामि Māl. 6. -2 Firmly or steadily fixed, uncontrollably fixed, steady, attentive, intent; अत्यभिनिविष्टचित्तदर्पस्य Dk. 29; Māl. 1. -3 Endowed with, possessed of; गुरुभिरभिनिविष्टम् (गर्भम्) लोकपालानुभावैः R. 2, 75. -4 Determined, resolute, persevering. -5 (In a bad sense) Obstinate, perverse; अथवाभिनिविष्टबुद्धिषु व्रजति व्यर्थकतां सुभाषितम् Śi. 16. 43; Ki. 17. 11. -6 Well-versed or proficient in. -**ष्टम्** Perseverance.

**अभिनिविष्टता** Resoluteness, determination of purpose; निन्दाक्षेपापमानादेरमर्षोऽभिनिविष्टता S. D. *i. e.* adhering to one's purpose; not minding censure, abuse, dishonour &c.

**अभिनिवेशः** 1 (*a*) Devotion, attachment, intentness, being occupied with, adherence to close application, with loc. or in comp.; कतमस्मिंस्ते भावाभिनिवेशः V. 3; अहो निरर्थकव्यापारेष्वभिनिवेशः K. 120. 146, Dk. 81; Māl. 7. (*b*) Firm attachment, love, fondness, affection; बलीयान् खलु मेऽभिनिवेशः Ś. 3; अनुरूपोऽस्या °शः *ibid.*, V. 2; असत्यभूते वस्तुन्यभिनिवेशः Mit. -2 Earnest desire, ardent longing or expectation; wish, desire; Māl. 5. 27. -3 Resolution, determined resolve, determination of purpose, firmness of resolve, perseverance; जनकात्मजायां नितान्तरूक्षाभिनिवेशमीशम् R. 14. 43; अनुरूप° शतोषिणा Ku. 5. 7; Śi. 3. 1. (*b*) Idea, thought; Ms. 12. 5; Y. 3. 155. -4 (In Yoga Phil.) A sort of ignorance causing fear of death; instinctive clinging to worldly life and bodily enjoyments and the fear that one might be cut off from all of them by death; अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशाः Yoga S.; cf. also Sāṅkhya

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



K. 150 and Malli. on Śi. 4. 55. -5 Pride; भयं द्वितीयाभिनिवेशतः स्यात् Bhāg. 11. 2. 37.

**अभिनिवेशिन्** *a.* 1 Devoted to, intent on, adhering or clinging to; त्रितयाभिनिवेशी च जायतेऽन्त्यासु योनिषु Y. 3. 134; कल्याणाभिनिवेशिनः K. 136 of blessed or noble resolve, 191. -2 Fixing on, directing or turning (the mind) to; गुणेष्वभिनिवेशिनी भर्तुरपि प्रिया M. 3; अहो नु खलु दुर्लभ °शी मदनः V. 1; Dk. 57. -3 Determined, resolute.

**अभिनिष्कारिन्** *a.* Ved. 1 Doing completely. -2 Injuring, thinking ill of; Av. 10. 1. 12.

**अभिनिष्क्रमणम्** 1 Going out or forth. -2 (With Buddhists) Leaving the house to become an anchorite.

**अभिनिष्टानः** [स्तन्-घञ्, सस्य च षत्वम् अभिनिशः स्तनः शब्दसंज्ञायां P. VIII. 3. 86] 1 A sound which dies away; विसर्जनीयोऽभिनिष्टानः. -2 A letter of the alphabet (°नो वर्णः). -3 The Visarga.

**अभिनिष्पत्** 1 P. To rush out, issue, sally, go forth; to spring or shoot forth; गवाक्षजालैरभिनिष्पतन्त्यः Bk. 1. 8.

**अभिनिष्पतनम्** Sallying, issuing.

**अभिनिष्पद्** 4 A. 1 To go or come to. -2 To enter into, become. -3 To appear, become visible -*Caus.* To bring to, help to.

**अभिनिष्पत्तिः** *f.* Completion, end, accomplishment, fulfilment.

**अभिनिष्यन्दः** Trickling; यस्याः पयोभिनिष्यन्दात्क्षीरोदो नाम सागरः Rām. 7. 23. 21.

**अभिनिह्नवः** Denial, concealment.

**अभिनी** 1 P. 1 To bring near, conduct or lead towards, carry to; तटाभिनीतेनाम्भसा Ki. 8. 32; अमात्यस्य गृहजनं स्वगृहमभिनीय रक्षसि Mu. 1, 5; 6. 15; दृष्ट्वा शरं ज्यामभिनीयमानम् Mb. being fitted to the bow. -2 To act, represent or exhibit dramatically, gesticulate; mostly occurring in stage-directions; श्रुतिमभिनीय Ś 3 acting as if he heard something; Mu. 1. 2, 3. 30; M. 2. 5. -3 To quote, adduce, introduce. -4 To allow to elapse

**अभिनयः** 1 Acting, gesticulation, any theatrical action (expressive of some sentiment, passion &c.); नृत्याभिनयक्रियाच्युतम् Ku. 5. 79; अभिनयान् परिचेतुमिवोद्यता R. 9. 33; नर्तकीरभिनयातिलङ्घिनीः 19. 14; Ki. 10. 42. -2 Dramatic representation, exhibition on the stage; ललिताभिनयं तमद्य भर्ता मरुतां द्रष्टुमनाः सलोकपालः V. 2. 18. S.D. thus defines and classifies अभिनय :—भवेदभिनयोऽवस्थानुकारः स चतुर्विधः । आङ्गिको वाचिकश्चैवमाहार्यः सात्त्विकस्तथा ॥ 274, 'acting is the imitation of condition', it is of four kinds:— (1) *gestural*, conveyed by bodily actions; (2) *vocal*, conveyed by words; (3) *extraneous*, conveyed by dress, ornaments, decoration &c.; (4) *internal*, conveyed by the manifestation of internal feeling such as perspiration, thrilling &c. **-Comp.** **-आचार्यः** a dancing preceptor; उभावभिनयाचार्यौ त्वां द्रष्टुमिच्छतः M. 1. 10 **-विद्या** science of acting or dramatic representation; art of dancing; मया नीर्थादभिनयविद्या शिक्षिता M. 1.

**अभिनीत** *p. p.* 1 Brought near, conveyed. -2 Performed, represented dramatically. -3 Highly finished or polished, most excellent. -4 Highly ornamented or decorated. -5 Fit, proper, suitable (योग्य); अभिनीततरं वाक्यमित्युवाच युधिष्ठिरः Mb. -6 Patient, forgiving, even-minded. -7 Angry (युक्तेऽतिसंस्कृतेमर्षिण्यभिनीतः Ak. where the word may be अमर्षिणि as well while Nm. reads युक्ते तु संस्कृतेऽमर्षिण्यभिनीतः प्रचक्ष्यते). -8 Kind, friendly. -9 Acknowledged, agreed (प्रतिज्ञात); मित्रार्थमभिनीतार्थं यथावत् कर्तुमर्हसि Rām. 4. 29. 12.

**अभिनीतिः** *f.* 1 Gesture, expressive gesticulation. -2 Kindness, friendship, patience; सान्त्वपूर्वमभिनीतिहेतुकम् Ki. 13. 36.

**अभिनेय,-नेतव्य** *pot. p.* To be acted or dramatically represented &c. दृश्यं तत्राभिनेयं तद्रूपारोपात्तु रूपकम् S. D. 273; M. 1; तस्य (प्रबन्धस्य) एकदेशः अभिनेयार्थः कृतः U. 4 a part of it has been adopted to the stage.

**अभिनेतृ** *m.* 1 One who brings near; वस्वो राशिमभिनेतासि भूरिम् Rv. 4. 20. 8. -2 An actor. **-त्री** An actress.

**अभिनुन्न** *a.* Agitated, full of woe; दण्डकाग्राभितुन्नाङ्गी चचाल भृशमाकुला Mb. 14. 58. 29.

**अभिन्न** *a.* 1 Not broken or cut, unbroken; not split; अभिन्नपुटोत्तरान् R. 17. 12. -2 Unaffected; क्लेशलेशैरभिन्नम् Ś. 2. 4. -3 Not changed or altered, unchanged; °गतयः Ś. 1. 14 with their gait unchanged. -4 Not different from, the same, identical (with abl.); जगन्मिथ्याभिन्नमभिन्नमीश्वरात् Prab. -5 Undivided, whole, one (as number). -6 Holding together, continuous. -7 Uninterrupted; अभिन्ने खिद्ये निदधाति देवयुम् Rv. 6. 28. 2.

**अभिन्यासः** A kind of fever.

**अभिपत्** 1 P. 1 To fly near, go or hasten near, approach; हन्तुमभिपतति पाण्डुसुतम् Ki. 12. 36; अधिरोढुमस्तगिरिमभ्यपतत् Śi. 9. 1; Dk. 72, 128; Mk. 9. 12; Ki. 10. 42. -2 To fall upon, attack, assail; यन्ता गजस्याभ्यपतद् गजस्थम् R. 7. 37; Dk. 62, 70, 96; Ki. 7. 19. -3 To fall down; fall (as tears). -4 To fall into, enter or come into. -5 To overtake in flying. -6 To pass over, traverse. -7 To get back, withdraw, retire; अभिपतितुमना लघुत्वभीतेः Śi. 7. 51; Ki. 10. 54. -8 (4 A.) To be lord or master of (Ved.). -*Caus.* To throw upon, throw down into; ज्वलनमभिपातयामि Ve. 6.

**अभिपतनम्** 1 Approaching. -2 Falling upon, assault, attack. -3 Going forth, departure.

**अभिपद्** 4 A. 1 To go to, draw near, approach (with acc.); रावणावरजा तत्र राघवं मदनातुरा। अभिपेदे निदाघार्ता

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यालीव मलयद्रुमम् ॥ R. 12. 32; 19. 11; Dk. 166; K. 265; to enter (into) Si. 3. 25 sometimes with loc. also. –2 To look upon, consider, regard; to take or know to be; क्षणमभ्यपद्यत जनैर्न मृषा गगनं गणाधिपतिमूर्तिरिति Si. 9. 27. –3 To help, assist; मयाऽभिपन्नं तं चापि न सर्वो धर्षयिष्यति Mb. 1. 50. 20. –4 To seize, catch hold of; overpower, attack, subdue, take possession of, overcome, afflict; सर्वतश्चाभिपन्नैषा धार्तराष्ट्रैर्महात्मभिः। चण्डवातामिपन्नानामुदधीनामिव स्वनः Mb.; See अभिपन्न also. –5 (a) To take, assume; स्थानि स्थान्यभिपद्यन्ते यथा कर्माणि देहिनः Ms. 1. 30 (b) To accept, receive; निरास्वाद्यतमं शून्यं (राज्यं) भरतो नाभिपत्स्यते Ram. –6 To apply or devote oneself to, undertake, fall to, observe; स चिन्तामभ्यपद्यत Rām. –7 To honour.

**अभिपत्तिः** *f.* 1 Approaching, drawing near. –2 Completion. –3 Protection; त्वमेव धर्मार्थदुघाभिपत्तये Bhāg. 4.6. 44. –4 See उपपत्तिः; अथाभिपत्तिर्लोकस्य कर्तव्या पुण्यपापयोः Mb. 12. 32. 20.

**अभिपन्न** *p. p.* 1 Gone or come near, approached, run towards, gone to (a state &c.); त्वमन्यमाकारमिवाभिपन्नः Ki. 3. 46. –2 Fled, fugitive, seeking refuge with. –3 Subdued, overpowered, afflicted, seized &c.; कालाभिपन्नाः सीदन्ति सिकतासेतवो यथा Rām. सीता वित्रास यथा वनान्ते सिंहाभिपन्ना गजराजकन्या Rām. 5. 28. 1. यदिदं सर्वं मृत्युनाभिपन्नम् Śat. Br.; दोष°, कश्मल°, व्याघ्र° &c. –4 Unfortunate, fallen into difficulties &c. –5 Accepted; Rām. 6. 63. 24. –6 Guilty; अभिपन्नाऽस्मि पाञ्चालि याज्ञसेनि क्षमस्व मे Mb. 3. 233. 61. –7 Removed to a distance. –8 Dead. –9 Endowed see उपपन्न; अभिपन्नमिदं लोके राज्ञामुद्यतदण्डनम् Mb. 12. 32. 20. –10 Protected; मयाऽभिपन्नं तं चापि न सर्वो धर्षयिष्यति Mb. 1. 50. 20.

**अभिपद्म** *a.* Very beautiful; पद्माभिपद्मानिव वारणेन्द्रान् Mb. 1. 187. 9.

**अभिपरिप्लुत** *a.* Overflowed, filled with, inundated; (fig.) overwhelmed, affected; attacked; shaken; शोकेन, मन्युना &c. Mb. 3.

**अभिपाण्डु** *a.* Faded, pale; मनोभुवा तप्त इवाभिपाण्डुताम् Ki. 4. 34.

**अभिपातः** 1 moving, walking about; वियदभिपातलाघवेन Ki. 7. 21. –2 Fall, ruin; नूनं प्रियाया मम नाभिपातः Rām. 3. 63. 8.

**अभिपित्वम्** *a.* or *s.* Ved. [पा भावे कित्वन्] 1 Come, approaching (अभिप्राप्त). –2 Visiting, putting up (for the night at an inn &c.): the time of coming. –3 Approaching time. –4 Close or departure of day, evening. –5 Dawn sacrifice.

**अभिपुष्प** *a.* [अभिनः पुष्पाण्यस्य] Covered over with flowers (as a tree). –**ष्पम्** An excellent flower.

**अभिपूज्** 10 P. 1 To adorn, worship. –2 To honour, approve, assent to; तथेति भरतो वाक्यं वसिष्ठस्याभिपूज्य तत् Rām. अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बध्यते Ms. 6. 58.

**अभिपूजनम्** Honouring; approving.

**अभिपूर्वम्** *ind.* One after another, successively.

**अभिपॄ** 3, 9 P. To fill. –*Pass.* To become full. *Caus.* 1 To fill, make full. –2 To load with (as animals); cover with. –3 To present with. –4 To overwhelm, overpower, master completely; शोको मामभ्यपूरयत् Rām.

**अभिपूरणम्** Filling, overpowering.

**अभिपूर्तम्** That which has been fulfilled: Av. 9. 5. 13.

**अभिप्रज्ञा** Thinking constantly of.

**अभिप्रणी** 1 P. To lead to, bring towards; उत प्रणेष्यभि वस्यो अस्मान् Rv. 1. 31. 18. consecrate; जज्वाल लोकस्थितये स राजा यथाध्वरे वह्निरभिप्रणीतः Bk. 1. 4.

**अभिप्रणयः** Affection, favour, propitiation.

**अभिप्रणयनम्** Consecrating by sacred hymns.

**अभिप्रतप्त** *a.* 1 Intensely heated. –2 Dried up. –3 Exhausted with pain, fever &c.

**अभिप्रथनम्** Spreading or extending over, throwing over.

**अभिप्रदक्षिणम्** *ind.* Towards the right.

**अभिप्रपद्** = प्रपद् q. v.

**अभिप्रमुर्** *f.* The tongue of fire (जुहू); Completely raised.

**अभिप्रवृत्** 1 A. 1 To advance up to, approach, go up to. –2 To fall or flow into; यत्र भागिरथी गङ्गां यमुनाऽभिप्रवर्तते Rām. –3 To become conversant with. –*Caus.* To roll onward or towards.

**अभिप्रवर्तनम्** 1 Advancing up to. –2 Proceeding, acting. –3 Flowing, coming forth, as of sweat.

**अभिप्रवृत्त** *p. p.* 1 Advancing, going up to. –2 Occurring. –3 Engaged or occupied in (with loc.); कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः Bg. 4. 20.

**अभिप्रश्निन्** *a.* Ved. Desirous of asking many questions.

**अभिप्राणनम्** Exhaling (opp. अपाननम्)

**अभिप्राप्, –प्तिः** &c. = प्राप् q. v.

**अभिप्रीतिः** *f.* Wish; rejoicing.

**अभिप्रे** [अभिप्र-इ] 2 P. 1 To go to or near, approach; कर्मणा यमभिप्रैति स संप्रदानम् P. I. 4. 32. –2 To intend, aim at, think of, mean; cf. अभिप्रेत.

**अभिप्राय** *a.* [इ-अच्] Going near, approaching; aiming at, intending, meaning, accruing to; स्वरितञितः कर्त्रभिप्राये क्रियाफले P. I. 3. 72. –**यः** 1 Aim, purpose, object, intention, wish, desire; अभिप्राया न सिद्ध्यन्ति तेनेदं वर्तते जगत् Pt. 1. 158; साभिप्रायाणि वचांसि Pt. 2 earnest words;



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भावः कवेरभिप्रायः. -2 Meaning, sense, import, implied sense of a word, passage &c.; नैषामयमभिप्रायः such is the meaning intended, import (of the passage &c.). -3 Opinion, belief. तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक् पृथक् Ms. 7. 57. -4 Relation, reference. -5 N. of Viṣṇu.

**अभिप्रेत** *p. p.* 1 Meant, aimed at, intended; designed; अत्रायमर्थोऽभिप्रेतः; किमभिप्रेतमनया Bh. 3. 67; निवेदयाभिप्रेतम् Pt. 1. -2 Wished, desired; यथाभिप्रेतमनुष्ठीयताम् H. 1. -3 Approved, accepted; पूर्वैरयमाभिप्रेतो गतो मार्गोऽनुगम्यते Rām. -4 Dear or agreeable to, favourite with, beloved; धर्मस्तवाभिप्रेतः Dk. 42; Ś. 6. -5 Wishing. -तम् Intellectual nature (बुद्धिवृत्तिः); त्वं प्रभास्त्वमभिप्रेतम् Mb. 1. 23. 18.

**अभिप्रोक्षणम्** Sprinkling upon.

**अभिप्लु** 1 A. 1 To go up to, jump or leap towards. -2 To overflow; (fig.) affect, fill with, overwhelm; तमसाभिप्लुते लोके रजसा च Mb.; रजसाभिप्लुतां नारीम् Ms. 4. 41 being in her courses; व्यसनाभिप्लुतेऽपि वा Y. 2. 50. -3 To spring to or over, spring upon. -*Caus.* To wash or ripple against.

**अभिप्लवः** 1 Affliction, disturbance. -2 Inundation, overflowing. -3 N. of a religious ceremony performed as part of the sacrifice गवामयन. -4 N. of the Prājāpatya Āditya.

**अभिप्लुत** *a.* 1 Overwhelmed; तमसाऽभिप्लुते लोके Mb. 4. 33. 1. -2 Affected; रजसाभिप्लुतां नारीं नरस्य ह्युपगच्छतः Ms. 4. 41.

**अभिबलम्** A technical term in Rhetoric; अभिबलमभिसन्धिश्छलेन यः S. D. 375 'an inquiry or examination by an artifice'. See Ratn. 3.

**अभिबुद्धिः** *f.* An organ of apprehension, a बुद्धीन्द्रिय or ज्ञानेन्द्रिय (opp. कर्मेन्द्रिय); these are the eye, tongue, ear, nose, and skin.

**अभिभङ्गः** 1 Breaking down. -2 One who breaks down or destroys.

**अभिभर्त्सित** *a.* Derided Mb. 3. 33.

**अभिभा** 2 P. To glitter or shine; दिवि स्थितः सूर्य इवाभिभाति Mb.

**अभिभा** Ved. [अभिभा-अद्] 1 Apparition, phenomenon; an inauspicious omen. मा त्वा का चिदभिभा विश्व्या विदन् Rv. 2. 42. 1. -2 A calamity, state of being overpowered. -3 Superiority.

**अभिभार** *a.* Very heavy.

**अभिभाष्** 1 A. (P. in epic poetry) 1 To speak to, address; talk or converse with (with acc.); भोभवत्पूर्वकं त्वेनमभिभाषेत धर्मवित् Ms. 2. 128; नोदक्यामभिभाषेत Ms. 4. 57. sometimes with instr. also; -2 To speak, say (as वाणीम्, वचः &c.); इति अभिभाषन्ते so they say. -3 To relate, narrate, speak of. -4 To proclaim, announce, confess; गुरुतल्प्यभिभाष्यैनस्तप्ते स्वप्यादयोमये Ms. 11. 103.

**अभिभाषणम्** Speaking to, addressing, conversing with.

**अभिभाषिन्** *a.* Addressing, speaking to; speaking, talking; स्मितपूर्वाभिभाषिणम् R. 17. 31 whose words are preceded by a smile, speaking with a smile.

**अभिभू** 1 P. 1 To overcome, subdue, conquer, vanquish (of persons or things); prevail over, predominate, defeat; (hence) excel, surpass; अभिभवति मनः कदम्बवायौ Ki. 10. 23; अभिभूय विभूतिमार्तवीम् R. 8. 36; 4. 56; 6. 29, 16. 10; K. 52, 53; Mu. 3. 20; Ms. 7. 5; धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत Bg. 1. 40 predominates over, overpowers; so शोकाभिभूत, विपद्°, काम° &c. -2 To attack, seize or fall upon, assail; विपदोऽभिभवन्त्यविक्रमम् Ki. 2. 14; अभ्यभावि भरताग्रजस्तया R. 11. 16, 84; Bri. S. 33. 30; ममापि सत्त्वैरभिभूयन्ते गृहाः Ś. 6 infested; परित्रायध्वं मामनेन मधुकरेणाभिभूयमानाम् Ś. 1 attacked, troubled; अभ्यभूभिलयं भ्रातुः Bk. 6. 117. -3 To humiliate, mortify, insult, disrespect; अण्डभङ्गाभिभूता Pt. 1. -4 To go up to, turn to or towards (Ved.); अभी षु णः सखीनामविता जरितॄणाम् । शतं भवास्यूतिभिः Rv. 4. 31. 3. -5 To be victorious or prosperous; पुष्यात् क्षेमे अभि योगे भवात्युभे Rv. 5. 37. 5. -*Caus.* To overpower, surpass, defeat &c.

**अभिभवः** 1 Defeat, subjugation, subjection, overpowering; इतरेतरानभिभवेन मृगास्तमुपासते गुरुमिवान्तसदः Ki. 6. 34 (cf. K. 45 and the Bible "The wolf shall also dwell with the lamb" &c.); 8. 28; स्पर्शानुकूला इव सूर्यकान्तास्तदन्यतेजोभिभवाद्वमन्ति Ś. 2. 7 when assailed, opposed, overpowered by another energy; अभिभवः कुत एव सपत्नजः R. 9. 4. 4. 21. -2 Being overpowered जराभिभवविच्छायम् K. 346; being attacked or affected, stupefied (by fever &c.); न रोगशान्तिर्न चाभिभवः Suśr. -3 Contempt, disrespect; निराभिभवसाराः परकथाः Bh. 2. 64. -4 Humiliation, mortification (of pride); अलभ्यशोकाभिभवेयमाकृतिः Ku. 5. 43; K. 195. -5 Predominance, prevalence, rise, spread; अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः Bg. 1. 41; Ki. 2. 37.

**अभिभवनम्** Overpowering, overcoming, being subjected to or overpowered by; जरया चाभिभवनम् Ms. 6. 62.

**अभिभावनम्** Making victorious, overpowering.

**अभिभाविन्-भाव(वु)क** *a.* 1 Overpowering, defeating, conquering: शोकाभिभाविना भयेनाभिभूता K. 170 fear which conquered grief. -2 Surpassing, excelling; सर्वतेजोऽभिभाविना R. 1. 14; Ki. 11. 6. -3 Disrespecting, humiliating. -4 Attacking.

**अभिभुः, -भूः** Ved. 1 One who surpasses or prevails over, a superior. -2 Pride (अहंकार); त्वं महानभिभूः Mb. 1. 23. 18.

**अभिभूति** *a.* That which defeats, conquers &c. -तिः 1 Predominance, prevalence, excessive or superior power; जूर्ति कृष्टिप्रो अभिभूतिमाशोः Rv. 4. 38. 9. -2 Conquering,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



defeat, subjugation; अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम मानिनः Ki. 2. 20. -3 Disrespect, disgrace, humiliation. -**Comp.** -ओजस् *a.* of superior or predominant power. *n.* superior power.

**अभिभूयम्** Ved. Superiority; Av. 19. 37. 3.

**अभिभूवन्** *a.* Ved. Prevailing or victorious over; surpassing; Rv. 10. 159. 5-6.

**अभिमद्** 4 P. Ved. To gladden, exhilarate, inebriate.

**अभिमादः** Intoxication.

**अभिमाद्यत्क** *a.* Half drunk, partially intoxicated, stammering (like a drunkard).

**अभिमन्** 4 A. (P. epic) 1 To wish or desire, long for, covet, like; न त्वेवं ज्यायसीं वृत्तिमभिमन्येत कर्हिचित् Ms. 10. 95; see अभिमत below. -2 *To assent to, approve of,* allow, admit; give a grant (to any one, dat.). -3 To think, fancy, imagine, consider, believe, regard; तामार्यामसावन्यथाऽभ्यमन्यत Dk. 164; Bk. 5. 71, U. 5. -4 To injure, threaten (Ved.) -5 (8 A.) To think of self.

**अभिमत** *p. p.* 1 Desired, wished, liked, dear, beloved, favourite (person or thing); agreeable, desirable; नास्ति जीवितादन्यदभिमततरमिह जगति सर्वजन्तूनाम् K. 35, 58; अभिमतफलशंसी चारु पुस्फोर बाहुः Bk. 1. 27; यथेवमभिमतम् Pt. 1 if you like to do so; तयोरभिमतं वद Mv. 6. 21 choose which you will: इक्ष्वाकुवंशोऽभिमतः प्रजानाम् U. 1. 44, Ś. 3. 5, Ku. 3. 23, Pt. 1. 70, Me. 51, Mu. 3. 4. -2 Agreed or assented to, liked, approved, accepted, admitted; न किल भवतां स्थानं देव्या गृहेऽभिमतं ततः U. 3. 32; प्रसिद्धमाहात्म्याभिमतानामपि कपिलकणभुक्प्रभृतीनाम् Ś. B. honoured, respected. -तम् Wish, desire. -तः A beloved person, lover; अभिमतमभितः कृताङ्गभङ्गा Śi. 7. 72, 8. 68, 10. 9.

**अभिमतिः** *f.* 1 Desire. -2 Pride; न विक्रिया विश्वसुहृत्सखस्य साम्येन वीताभिमतेस्तथापि Bhāg. 5. 10. 25. -3 Respect, regard, see अभिमान below.

**अभिमनस्** *a.* 1 Intent on, desirous of; युद्धाभिमनसः सर्वे Rām. 5. 42. 26. -2 anxious, longing for; भवतोऽभिमनाः समीहते सरुषः कर्तुमुपेत्य माननाम् Śi. 16. 2 (where अ° also means undaunted, of fearless mind).

**अभिमनायते** Den. A. To have life, be full of life and joy, be pleased or delighted, to long for; अभ्यमनायिष्ट चान्तरात्मा Dk. 111, 119; कान्तिं (विलोक्य) नाभिमनायेत को वा स्थाणुसमोऽपि ते Bk. 5. 73 (Com. = सचेताः or प्रीतमनाः).

**अभिमन्तुः** *f.* Ved. Injuring, harming, destroying; °न्तोः to destroy; to claim as one's own, pretending.

**अभिमन्तृ** *a.* Longing for; self-conceited, referring all objects to self; Ms. 1. 14.

**अभिमानः** 1 Pride (in a good sense), self-respect, honourable or worthy feeling; सदाभिमानैकधना हि मानिनः Śi. 1. 67; त्यक्त्वा जातिकुलाभिमानमुचितम् Bh. 3. 5. अभिमानधनस्य गत्वरैः Ki. 2. 19; संकल्पयोनेरभिमानभूतम् Ku. 3. 24. -2 Self-conceit, pride, arrogance, haughtiness, egotism, high-opinion of oneself; शिथिल° नाः संवृत्ताः M. 2, Bh. 3. 46, Bg. 16. 4.; (अतिमानः is another reading) °वत् proud, conceited. -3 Referring all objects to self, the act of अहंकार, personality, misconception (मिथ्याज्ञानम्), see अहंकार. -4 Conceit, conception; supposition, belief, opinion; मुनिरस्मि निरागसः कुतो मे भयमित्येष न भूतयेऽभिमानः Ki. 13. 7. -5 Knowledge, consciousness (बुद्धि, ज्ञान); साधारण्याभिमानतः S. D. -6 Affection, love. -7 Desire, wishing for. -8 Laying claim to. -9 Injury, Killing, seeking to injure. -10 A sort of state occasioned by love. -नम् Authority (प्रमाण); ये चरन्त्यभिमानानि सृष्टार्थमनुषङ्गिणः Mb. 12. 168. 23. -**Comp** -शालिन् *a.* proud. -शून्य *a.* void of pride or arrogance, humble.

**अभिमानितम्** *1 Egotism. -2 Love; copulation, sexual* union.

**अभिमानिन्** *a.* Possessed of self-respect; Ki. 1. 31; K. 212. -2 Having a high opinion of oneself, proud, arrogant, conceited. -3 Regarding all objects as referring to one's own self; अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् Br. Sūt 2. 1. 5. -4 Fancying, pretending, or regarding oneself to be; नरेन्द्र° Dk. 51; K. 194. *m.* A form of Agni.

**अभिमानुक** *a.* Ved. [मन् बाहु° उकञ्] Striving to hurt or injure.

**अभिमन्त्र्** 10 A. (P. also) 1 To consecrate or accompany with sacred hymns; पशुरसौ योऽभिमन्त्र्य क्रतौहतः Ak.; वामदेवाभिमन्त्रितोऽश्वः U. 2; गायत्र्या चाभिमन्त्रयेत् Y. 3. 325; 2. 102; 3. 278. -2 To consecrate with magical formulas, charm, enchant, invoke or invite by means of charms; तदभिमन्त्रितेन चरणेन Dk. 138; पानीयैरभिमन्त्रितैः Mb. -3 To speak to, address, invite.

**अभिमन्त्रणम्** Consecrating, hallowing, making sacred by repetition of special formulas or Mantras; दत्वान्नं पृथिवीपात्रमिति पात्राभिमन्त्रणम् (कृत्वा) Y. 1. 238; मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मरेत्। शेषिणं तन्मना भूत्वा स्यादेतदभिमन्त्रणम्॥ Mīmāṁsā. -2 Charming, enchanting. -3 Addressing, inviting, advising.

**अभिमन्थ्** = अभिमन्थ् q. v.

**अभिमन्यमान** *a.* Making a lascivious attempt on. ब्राह्मणकन्यामभिमन्यमानः भोजः Kau. A. 1. 6.

**अभिमन्युः** 1 N. of a son of Arjuna by his wife Subhadrā, sister of Kriṣṇa and Balarāma; also known by the metronymic Saubhadra. [He was called *Abhimanyu* because at his very birth he appeared to be heroic, long-armed and very fiery (अभितः मन्युर्यस्य). When the Kauravas at the advice of Droṇa formed the peculiar battle-array called 'Chakravyūha' hoping that, as Arjuna was away, none of the Pāṇḍavas

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



would be able to break through it. Abhimanyu assured his uncles that he was ready to try, if they only assisted him. He accordingly entered the Vyūha, killed many warriors on the Kaurava side, and was for a time more than a match even for such veteran and elderly heroes as Droṇa, Karṇa, Duryodhana &c. He could not, however, hold out long against fearful odds, and was at last overpowered and slain. He was very handsome. He had two wives, Vatsalā daughter of Balarāma and Uttarā daughter of the king of Virāṭa. Uttarā was pregnant when he was slain and gave birth to a son named Parīkṣita who succeeded to the throne of Hastināpura.] -2 Name of a son of Manu Chākṣuṣa. -3 Name of two kings of Kāshmir; Rāj. T. **-पुरम्** -Name of a town. Raj. T.

**अभिमरः** [ मृ-अच् ] 1 Killing, destruction, slaughter. -2 War, combat. -3 Treachery in one's own camp; danger from one's own men or party. -4 Binding, confinement; a tie or fetter. -5 One's own party or army. -6 One who desperately goes to fight with tigers, elephants &c.

**अभिमाति** *a.* [ मे कर्तरि क्तिन् न इत्वम् ] 1 Insidious; स हि ष्मा विश्वचर्षणिरभिमाति सहो दधे Rv. 5. 23. 4. -2 Striving or seeking to injure, inimical. **-तिः** *f.* 1 Seeking to injure, hurting, plotting against. -2 An enemy, a foe.

**अभिमातिन्** *a.* [ मे-क्त, इष्टादिभ्यः इन् ] 1 Insidious; बाधन्ते विश्वमभिमातिनम् Rv. 1. 85. 3. -2 One who hurts or injures, an enemy.

**अभिमाय** *a.* [ अभिगतो मायामविद्याम् ] Bewildered ( इतिकर्तव्यतामूढ ); ignorant, foolish.

**अभिमि ( मे ) ह्य** *a.* Ved. To be wetted ( by making water upon ).

**अभिमुख** *a.* ( **-खी** *f.* ) [ अभिगतं मुखं यस्य अभेर्मुखम् P. VI. 2. 185 ] 1 With the face turned or directed towards, in the direction of, towards, turned towards, facing; अभिमुखे मयि संहृतमीक्षितम् Ś. 2. 12. °खा शाला Sk.; गच्छन्नभिमुखो वह्नौ नाशं याति पतङ्गवत् Pt. 1. 237; with the acc.; राजानमेवाभिमुखा निषेदुः; पम्पामभिमुखो ययौ Rām.; Bg. 11. 28; K. 264; sometimes with dat., or gen. or loc.; आश्रमायाभिमुखा बभूवुः Mb.; यस्ते निष्ठेदभिमुखे रणे Rām.; मय्यभिमुखीभूय Dk. 124; also in comp. शकुन्तलाभिमुखो भूत्वा Ś. 1 turning towards Ś.; Ku. 3. 75, 7. 9. -2 Coming or going near, approaching, near or close at hand; अभिमुखीष्विव वाञ्छितसिद्धिषु व्रजति निर्वृतिमेकपदे मनः V. 2. 9.; यौवनाभिमुखी संजज्ञे Pt. 4; R. 17. 40. -3 Disposed or intending to, inclined to; ready for, about (to do something), in comp.; चन्द्रापीडाभिमुखहृदया K. 198, 233; अस्ताभिमुखे सूर्ये Mu. 4. 19; प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः Ku. 2. 16; 5. 60; U. 7. 4, Māl. 10. 13; कर्मण्यभिमुखेन स्थेयम् Dk. 89; अनभिमुखः सुखानाम् K. 45; प्रातः प्रयाणाभिमुखाय तस्मै R. 5. 29; निद्रा चिरेण नयनाभिमुखी बभूव 5. 64; sometimes as first member of comp. in this sense; फलमभिमुखपाकं राजजम्बूद्रुमस्य; V. 4. 27. -4 Favourable, friendly or favourably disposed; आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः Ratn. 1. 5. -5 Taking one's part, nearly related to. -6 With the face turned upwards. **-खः** Forepart ( अग्र ); तस्येषुपाताभिमुखं ( विसृज्य ) Bhāg. 9. 6. 18. **-खी** One of the 10 earths according to Buddhists. **-खम्, -खे** *ind.* Towards, in the direction of, facing, in front or presence of, near to; with acc., gen. or in comp. or by itself; स दीप्त इव कालाग्निर्जज्वालाभिमुखं खगम् Rām. 5. 67. 12. आसीताभिमुखं गुरोः Ms. 2. 193; तिष्ठन्मुनेरभिमुखं स विकीर्णधाम्नः Ki. 2. 59; Śi. 13. 2; Ki. 6. 46; नेपथ्याभिमुखमवलोक्य Ś. 1; स पुराभिमुखं प्रतस्थे Pt. 3; Me. 70; कर्णं ददात्यभिमुखं मयि भाषमाणे Ś. 1. 30; also at the beginning of comp.; अभिमुखनिहतस्य Bh. 2. 112 killed in the front ranks of battle.

**अभिमुखता** 1 Presence, proximity. -2 Favourableness; °तां नी to win over. मुनिमभिमुखतां निनीषवो याः समुपययुः कमनीयतागुणेन Ki. 10. 40.

**अभिमुखीकृ, -मुखयति** To propitiate, win over; अथ भूतभव्यभवदीशमभिमुखयितुं कृतस्तवाः Ki. 12. 19; K. P. 2.

**अभिमुखीकरणम्** Causing ( one ) to turn the face towards; speaking to, addressing ( in gram. ); संबोधनमभिमुखीकरणम्.

**अभिमूर्छित** *a.* Utterly confused, bewildered.

**अभिमृद्** 1 P. To crush by standing, tread under foot, trample down; oppress, devastate (as a country). -2 ( In astr. ) To contend against, oppose, be in opposition.

**अभिमर्दः** 1 Rubbing, friction. -2 Crushing down, trampling down; कृतोऽभिमर्दः कुरुभिः प्रसह्य Mb. 3. 269. 8. -3 Ravage, devastation of a country ( by an enemy ). -4 War, battle. कथं शक्यामहे ब्रह्मन् दानवैरभिमर्दनम् Mb. 12. 209. 12. -5 Spirituous liquor.

**अभिमर्दन** *a.* Crushing down, oppressing. **-नम्** Crushing, oppression.

**अभिमृश्** 6 P. To touch ( in all senses ); come in contact with; strike or rub gently; अभि प्रियाणि मर्मृशत् पराणि Rv. 3. 38. 1; पदाभिमृष्ट, वचसा°, पावनक°, गदा°.

**अभिमर्शः, -र्शनम्, -मर्षः, -र्षणम्** 1 Touch, contact; उष्णांशुकराभिमर्षात् Śi. 4. 16. -2 Assault; violence, attack; सर्वतः समुपेतस्य तव तेनाभिमर्षणम् Rām. 6. 111. 8. -3 Outraging, touching carnally, sexual intercourse; कृताभिमर्शामनुमन्यमानः Ś. 5. 20 carnally touched or embraced, seduced, outraged; पराभिमर्शो न तवास्ति Ku. 5. 43 (Malli = परधर्षणम् ); परदाराभिमर्शेषु प्रवृत्तान् Ms. 8. 352, Y. 2. 284. ( v. l. अवमर्शनम् ). cf. also आत्मानं मृगमुद्दिश्य भ्रातृदाराभिमर्शनम् । Abhiṣeka. 1. 20. तस्य दाराभिमर्शेन कथं दण्ड्योऽस्मि राघव । Abhiṣeka 1. 21

**अभिमर्शक, -र्षक, -मर्शिन्, -र्षिन्** *a.* 1 Touching, coming in contact with. -2 Outraging; assaulting,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परस्वहरणे युक्तं परदाराभिमर्शकं त्याज्यमाहुः Rām. 6. 87. 22. स्वकलत्राभिमर्शं वैरास्पदं धनमित्रः Dk. 63.

**अभिमृष्ट** *p. p.* **1** Touched, rubbed or stroked gently; **-2** Brought close to, grazing.

**अभिमेथिक** *a.* Ved. **-मेथिका 1** Use of words or language calculated to secure every thing (सर्वप्राप्तिसाधनो वाग्भेदः). **-2** Abusive speech, obscene expression; an imprecation.

**अभिम्लात, -न** *a.* Ved. Altogether faded or withered, decayed.

**अभियज्ञः** A sacrificial act. **-Comp. -गाथा** a sacrificial verse.

**अभिया** 2 P. **1** To go up to, approach, go or repair to; अभिययौ स हिमाचलमुच्छ्रितम् Ki. 5. 1; R. 9. 27. **-2** To come or draw near (without an object); come (as time). **-3** To march against, attack, assail, encounter; अभि स्पृधो यासिषद् वज्रबाहुः Rv. 1. 175. 5; कुबेरादभियास्यमानात् R. 5. 30; Dk. 30. **-4** To give or resign oneself to, devote, attach or betake oneself to. **-5** To partake or share in, get, obtain. *-Caus.* To send away.

**अभिया** *m., f.* Going to, approaching, assailing.

**अभियात्, -यातिन्** *a.* approaching, assailing, encountering; assailant; रामाभियायिनां तेषाम् R. 12. 43.

**अभियातिः, -यायिन्, -तृ** *m.* (**-यी, -ता**) Approaching with hostile intentions, an assailant, enemy, a foe. **-तिः** *f.* Assailing.

**अभियानम्** 1 Approaching. **-2** Marching against, attack, assault; सीता श्रुत्वाभियानं मे आशामेष्यति जीविते Rām. 6. 4. 4; असहन्तोऽभियानं नच्छाल्वराजस्य कौरव Mb. 3. 16. 9. रणाभियानेन Dk. 10 marching out for battle.

**अभियाच्** 1 A. To beg, request, ask for, solicit (= याच् q. v).

**अभियाचनम्, -याच्ञा** Asking for, request, an entreaty, solicitation.

**अभियुज्** 7 A. **1** To apply oneself to, exert oneself, make oneself ready for, prepare, set about, strive or endeavour (used in *passive* also in this sense); नयदि न सहते ततः स्वयमभियुज्यस्व। एते स्वकर्मण्यभियुज्यामहे। Mu. 3; Dk. 55; K. 300; व्यसनमभियुञ्जानस्य Mu. 4 trying to find out a weak point. **-2** To attack, assail; भवन्तमभियोक्तुमुद्युङ्क्ते Dk. 3; वृषलमभियोक्तुमुद्यतः Mu. 1; क इदानीमभियोक्ष्यते U. 3. **-3** To accuse, charge; complain or inform against, prosecute, claim or demand (as in a law-suit); न तत्र विद्यते किंचिद्यत्परैरभियुज्यते Ms. 8. 183; विभाविनैकदेशेन देयं यदभियुज्यते V. 4. 17 claimed, asked, or demanded; Y. 2. 9, 28, 100. **-4** To wish or long for, desire, ask for, request. **-5** To say, speak, tell; नाभियोक्तुमनृतं त्वमिष्यसे Ki. 13. 58, 14. 7. **-6** To appoint to, entrust with (with loc.). **-7** To use with (instr.). **-8** To be working or operative. **-9** To put to; harness; harness repeatedly. **-10** To hurt. *-Caus.* To join or unite to, attach oneself to; परकलत्रेषु सुहृत्त्वेनाभियोज्य Dk. 163.

**अभियुक्त** *p. p.* **1** (*a*) Engaged or occupied or absorbed in, applying oneself to, intent on; स्वस्वकर्मण्यधिकतरमभियुक्तः परिजनः Mu. 1. (*b*) Diligent, persevering, resolute, zealous, intent, assiduous, zealously engaged, attentive, careful; इदं विश्वं पाल्यं विधिवदभियुक्तेन मनसा U. 3. 30; Mu. 1. 13; Dk. 55; अश्वावेक्षणेऽनभियुक्ते Mu. 3; भवतु भूयोऽभियुक्तः स्वरव्यक्तिमुपलप्स्ये Mu. 1; तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् Bg. 9. 22; Kām. 5. 77. **-2** Well-versed or proficient in; शास्त्रार्थेष्वभियुक्तानां पुरुषाणाम् Kumārila. **-3** (Hence) Learned, of acknowledged position; a competent judge, an expert, connoisseur, a learned person (*m.* also in this sense); न हि शक्यते दैवमन्यथाकर्तुमभियुक्तेनापि K. 62; अन्येऽभियुक्ता अपि नैवेदमन्यथा मन्यन्ते Ve. 2; सूक्तमिदमभियुक्तैः प्रकृतिर्दुस्त्यजेति *ibid.* **-4** Attacked, assailed; अभियुक्तं त्वयैनं ते गन्तारस्त्वामतः परे Śi. 2. 101; Mu. 3. 25. **-5** Accused, charged, indicted; Mk. 9. 9; prosecuted; a defendant; अभियुक्तोऽभियोगस्य यदि कुर्यादपह्नवम् Nārada. **-6** Appointed. अभियुक्ताश्च ये यत्र यन्निबन्धं नियोजयेत् Śukra 4. 545. **-7** Said, spoken. **-8** Proper, just; श्रेयोऽभियुक्तं धर्म्यं च Rām. 7. 11. 38. **-9** Believing, putting faith in; हितेष्वनभियुक्तेन सोऽयमासादितस्त्वया Mb. 6. 63. 2.

**अभियुग्व (ग्व) न्** *m.* One who hurts or attacks; an enemy.

**अभियुज्** *f.* (**कृ-ग्**) **1** Attacking &c. **-2** An enemy.

**अभियोक्तव्य, -योज्य** *pot. p.* To be rebuked or blamed; to be accused; न स राज्ञाऽभियोक्तव्यः Ms. 8. 50; assailable, indictable.

**अभियोक्तृ** *a.* Assailing, attacking, accusing *m.* (**क्ता**) **1** An enemy, assailant, invader; त्वय्युत्कृष्टबलेऽभियोक्तरि नृपे Mu. 4. 15; H. 3. 86. **-2** (In law) A complainant, plaintiff, accuser, prosecutor; तत्राभियोक्ता प्राक् पृष्टो ह्यभियुक्तस्त्वनन्तरम् Śukra. 4. 655. Ms. 8. 52, 58; Y. 2. 95. **-3** A pretender, claimant; a stronger party.

**अभियोगः 1** Application or devotion (to something); connection; गुरुचर्यातपस्तन्त्रमन्त्रयोगाभियोगजाम् Māl. 9. 52; Ch. P. 11. **-2** Close application, perseverance, zealous intentness, energetic effort, exertion; °भाज् persevering, resolute; निरुत्सुकानामभियोगभाजाम् Ki. 3. 40; सन्तः स्वयं परहितेषु कृताभियोगाः Bh. 2. 73; Māl. 1. 31; मद्विक्रियाभियोगेन Māl. 1; तदभियोगं प्रति निरुद्योगः Mu. 1.; स्वयमभियोगदुःखैः *ibid.*; Dk. 41; K. 345; Śi. 7. 63. **-3** (*a*) Application or devotion to learn something; कस्यां कलायामभियोगो भवत्योः M. 5 to what art have you applied or devoted yourselves; K. 109. (*b*) Learning, scholarship; अभियोगश्च शब्दादेरशिष्टानां अभियोगश्चेतरेषाम् ŚB on MS. **-4** (*a*) Attack,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



assault; invasion (of a town or country); क्षुभितं वनगोचराभियोगात् Ki. 13. 10, 2. 46; Ku. 7. 50; Ve. 4; Māl. 8; Mu. 2, 1. 7; Mv. 6. 38. (b) Battle, war, conflict. -5 (In law) A charge, accusation, plaint, indictment; अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत् Y. 2. 9.

**अभियोगिन्** *a.* 1 Devoted to, intent on, absorbed in (in comp). -2 Attacking, assaulting. -3 Accusing; मिथ्याभियोगी Y. 2. 11. *m.* A plaintiff, complainant.

**अभियोजनम्** Ved. Harnessing (one horse) on to another, re-fastening to make firm or tight (Sāy. युक्ते पुनर्योजनम्).

**अभिरक्ष्** 1 P. 1 To protect, preserve, keep, guard, help; भीष्ममेवाभिरक्षन्तु Bg. 1. 10, 11. -2 To rule over, govern (as earth &c.); command.

**अभिरक्षा,-रक्षणम्** Universal or complete protection; protection in every quarter; प्रशान्तबाधं दिशतोऽभिरक्षया Ki. 1. 18.

**अभिरक्षितृ** *a.* Protecting, guarding.

**अभिरञ्ज्** *pass.* 1 To be coloured or tinted. -2 To be flushed or greatly delighted, exult. -*Caus.* To tinge, colour, tint.

**अभिरक्त** *p. p.* 1 Devoted, intent, attached. -2 Sweet; सुजातपक्ष्मामभिरक्तकण्ठीम् Rām. 5. 5. 25.

**अभिरञ्जनम्** Colouring.

**अभिरम्** 1 A. (rarely P.) 1 To be pleased or delighted (with loc.); दृष्टिरिहाभिरमते हृदयं च Mk. 4, 5. 15; न गन्धहारिणो दमनककेदारिकायामभिरमति Vb. 3; Ratn. 2, Y. 1. 252. -2 To please or gratify oneself, take pleasure or delight in (with loc.); विद्यासु विद्वानिव सोऽभिरेमे Bk. 1. 9. -*Caus.* To gratify, please; मत्स्यपत्नीरभिरमयिष्यसि Dk. 90, 92, 163.

**अभिरत** *p. p.* 1 Glad, delighted, satisfied, (विप्रविसर्जने) अभिरम्यतामिति वदेद् ब्रूयुस्तेऽभिरताः स्म ह Y. 1. 252; रेचितं परिजनेन महीयः केवलाभिरतदम्पति धाम Si. 10. 55, 89. -2 Engaged in, devoted or attached to; performing, practising; स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः Bg. 18. 45. -3 Attentive to.

**अभिरतिः** *f.* 1 Pleasure, delight, satisfaction; attachment or devotion to; न मृगयाभिरतिर्न दुरोदरम् (तमपाहरत्) R. 9. 7; Ki. 6. 44. -2 Practice, occupation.

**अभिरमणम्** Delighting in.

**अभिराम** *a.* 1 Pleasing, delightful, sweet, agreeable; लोकाभिरामं रणरङ्गधीरम् Rām-rakṣā. मनोऽभिरामाः (केकाः) R. 1. 39; 2. 72; 6. 47; अनपेतकालमभिरामकथाः Ki. 6. 30. -2 Beautiful, lovely, graceful, charming; स्यादस्थानोपगतयमुनासंगमेवाभिरामा Me. 53; कुमारा माराभिरामाः Dk. 10; °त्वं प्रमदवनस्य V. 2; राम इत्यभिरामेण वपुषा तस्य चोदितः R. 10. 67, 13. 32; K. 145; Mv. 5. 47-8. Ś. 3. 26. -मः An epithet of Śiva. -मम् *ind.* 1 Gracefully, beautifully; ग्रीवाभङ्गाभिरामं दत्तदृष्टिः Ś. 1. 7. -2 Referring to Rāma.

**अभिरम्भित** *a.* Seized by; कश्मलं महदभिरम्भितः Bhāg. 5. 8. 15.

**अभिराज्** *a.* Reigning everywhere, supreme.

**अभिराध्** *Caus.* To propitiate; निरगमदभिराद्धुमादृतानां भवति महत्सु न निष्फलः प्रयासः Si. 7. 1.

**अभिराधनम्** Propitiation; ब्राह्मणस्याभिराधनम् (त्वं कर्तुमर्हसि) Mb. 3. 303. 14.

**अभिराद्ध** *a.* Propitiated, pleased; दशाननादीनभिराद्धदेवता... Si 1. 71

**अभिराष्ट्र** *a.* Ved. Who has gained dominion or supremacy.

**अभिरुच्** 1 A. 1 To shine, look finely; धर्मोऽभिरोचते यस्माद्धर्मराजस्ततः स्मृतः Mārk. P. -2 To like, desire; यदभिरोचते or अभिरुचितं भवते V. 2 -*Caus.* To be inclined to, have a taste or liking for, long, desire or wish for.

**अभिरुचिः** *f.* 1 Desire, taste, liking, relish, delight, pleasure; यशसि चाभिरुचिः Bh. 2. 63; (v. l. अभिरतिः) परस्पराभिरुचिनिष्पन्नो विवाहः K. 367. -2 Desire of fame, ambition; splendour.

**अभिरुचित** *p. p.* Liked, beloved. -तः A lover; (वामताम्) तेनिरेऽभिरुचितेषु तरुण्यः Si. 10. 58.

**अभिरुचिर** *a.* Very pleasant or agreeable, beautiful, splendid, bright; Rv. 3. 39. 5

**अभिरुत** *a.* Sounded, vocal; cooed (as the voices of birds &c.). -तम् A sound, cry, noise. Rām. 4.

**अभिरूप** *a.* [अभिगतो रूपम्] 1 Corrseponding with, conformable or suitable to, congruous; अभिरूपमस्या वयसो वल्कलम् Ś. 1. V. 1. -2 Pleasing, delightful, handsome, charming, beautiful, well-formed; अभिरूपेणापि स्वदारसंतुष्टेन K. 51; उत्कृष्टायाभिरूपाय वराय सदृशाय च (कन्यां दद्यात्) Ms. 9. 88. -3 Dear to, beloved or liked by, favourite; यो यः प्रदेशः सख्या मेऽभिरूपः Ś. 6. -4 Learned, wise, enlightened; अभिरूपभूयिष्ठा परिषदियम् Ś. 1; K. 78; Ms. 3. 144. cf. ग्रामरूपाभिरूपौ द्वौ विद्वांसे सुन्दरेऽपि च Nm. -पः 1 The moon. -2 Śiva. -3 Viṣṇu. -4 Cupid, -Comp. °पतिः 'having an agreeable husband', N. of a fast or rite performed to secure a good husband in the next world; Mk. 1.

**अभिरूपक** = अभिरूप q. v.

**अभिरोरुद** *a.* Ved. Causing tears (of joy or earnest desire); Av. 7. 38. 1.

**अभिलक्षित** *a.* 1 Marked with signs, bearing marks; मुमोच परमेष्वासः षट् शरानभिलक्षितान् Rām. 3. 28. 26. -2 Selected; दाक्षिणां प्रेषयामास वानरानभिलक्षितान् Rām. 4. 41.1.

**अभिलक्ष्य** *a.* To be marked or noted. हरिस्तस्याभिलक्ष्यस्य मोक्षयंल्लक्ष्यसंग्रहम् Rām. 5. 48. 30. -क्ष्यम् *ind.* Towards a mark or aim.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अभिलङ्घ्** 1, 10 P. 1 To jump across or over; (अग्निं) न चैनमभिलङ्घयेत् Ms. 4. 54; Y. 1. 137. -2 To attack, rush upon or over, fly at; तत्रभवत्या वदनमभिलङ्घति मधुकरः Ś. 6. -3 To violate, transgress; to offend, injure.

**अभिलङ्घनम्** Jumping across or over, flying at.

**अभिलप्** 1 P. To talk to or address; अभिलपतश्च द्वारनिहितलोचनौ Mk. 2.

**अभिलापः** 1 Expression, word, speech; अनर्थासतार्थपदाकुलोऽभिलापः Ki. 10. 61. -2 Declaration, mention, specification; न च स्मार्तमतद्धर्माभिलापात् Br. Sût. 1. 2. 19. -3 Declaration of the object of a vow or religious obligation.

**अभिलम्भनम्** Acquisition; शशंस पित्रे तत्सर्वं वयोरूपाभिलम्भनम् Bhâg. 9. 3. 23.

**अभिलष्** 1, 4 P. To desire or wish for, long for, covet, crave or yearn after; तेन दत्तमभिलेषुरङ्गनाः R. 19. 12; मानुषानभिलष्यन्ती Bk. 4. 22.

**अभिलषणम्** Desiring, longing.

**अभिलषित** *p. p.* Desired, wished, longed for. **-तम्** Desire, wish, will, pleasure; यथाभिलषितं अनुष्ठीयताम् Pt.1.

**अभिलाषः** (°सः sometimes) A desire, wish, longing for, craving after; affection, longing of a lover, love, (usually with loc. of the object of desire); अतोऽभिलाषे प्रथमं तथाविधे मनो बबन्ध R. 3. 4; भव हृदय साभिलाषम् Ś. 1. 27; Me. 112. साभिलाषं निर्वर्ण्य Ś. 3 casting a coveting or wistful look; न खलु सत्यमेव शकुन्तलायां ममाभिलाषः Ś. 2, Pt. 5. 67; sometimes with प्रति and acc., or in comp.

**अभिलाषक, -लाषि (सि) न्, -लाषुक** *a.* Wishing or desiring for (with acc., loc. or in comp.); desirous, covetous, greedy of; यदार्यमस्यामभिलाषि मे मनः Ś. 1. 22. जलाभिलाषी जलमाददानाम् R. 2. 6; 3. 36; Me. 80; जयमत्रभवान् नूनमरातिष्वभिलाषुकः Ki. 11. 18; Śi. 15. 59.

**अभिलावः** [लू-घञ् निरभ्योः पूल्वोः P. III. 3. 28] Cutting, reaping, mowing. वनाभिलावान् कुर्वन्तः स्वेच्छया चारुविक्रमाः Bk. 7. 37.

**अभिलिखित** *a.* Written, inscribed. **-तम्, अभिलेखितम्, -नम्** 1 Writing, inscribing. -2 A writing; ज्ञातिबन्धुसाक्ष्यभिलेखितैः Y. 2. 149. A written document.

**अभिली** 4. A. To enter into, lurk or lie hid into; कपिलाशवस्य कोडमभ्यलीयत Dk. 6.

**अभिलीन** *a.* 1 Adhering or clinging to, attached to; तिरश्चकार भ्रमराभिलीनयोः सुजातयोः पङ्कजकोशयोः श्रियम् R. 3. 8. -2 Embracing, shrouding; पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः Me. 38.

**अभिलुलित** *a.* 1 Agitated, disturbed. -2 Playful, unsteady.

**अभिलूता** *f.* A sort of spider.

**अभिवक्तृ** *a.* One who speaks arrogantly; Mb.12. 180. 48.

**अभिवद्** 1 P. 1 To speak to, address; परस्त्रियं योऽभिवदेत्तीर्थेऽरण्ये वनेऽपि वा Ms. 8. 356; Y. 2. 301. -2 To speak of or with reference to, tell, declare, mention; यत्कर्म क्रियमाणं ऋगभिवदति Ait. Br. -3 To express, utter, signify; यद्वाचाऽनभ्युदितं येन वागभ्युद्यते। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते Ken. 1. 4. -4 To name, call. -5 To salute, greet; see *caus.* -*caus.* 1 To greet or salute respectfully, oft. with the mention of the person saluted and the person who salutes; तात प्राचेतसान्तेवासी लवोऽभिवादयते U. 6. भगवन्नभिवादये V. 5; see अभिवाद also. -2 To cause to salute (with acc. or instr. of agent of action); अभिवादयते देवं भक्तं भक्तेन वा. -3 To utter, pronounce. -4 To play on an instrument.

**अभिवदनम्** 1 Addressing &c. -2 Salutation.

**अभिवादः, -वादनम्** 1 Reverential salutation, respectful obeisance, salutation of a superior or elder by an inferior or junior, or of a teacher by his disciple. It consists in (1) rising from one's seat (प्रत्युत्थान); (2) clasping the feet (पादोपसंग्रह), and (3) repeating the form of salutation (अभिवाद) which includes the name or title of the person addressed, followed by the mention of the person's own name. For the different ways of performing obeisance and the merit arising therefrom see Ms. 2. 120-126. -2 Abuse, insulting or scurrilous speech (for अतिवाद).

**अभिवादक** *a.* (**-दिका** *f.*) 1 Saluting; saluter -2 Polite, respectful, humble.

**अभिवादयितृ** *m.* A respectful saluter.

**अभिवादिन्** *a.* 1 Saluting respectfully. -2 Describing, referring to; तदभिवादिनी एषा ऋग्भवति Nir.

**अभिवाद्य, -वादनीय** *pot. p.* To be respectfully saluted. **-द्यः** N. of Śiva.

**अभिवन्द्** 1 A. To salute respectfully.

**अभिवन्दनम्** Respectful salutation; पाद° holding the feet (of another) as an humble obeisance; see अभिवादनम् above.

**अभिवयस्** *a.* 1 Very fresh or young; तीव्रस्याभिवयसो अस्य पाहि Rv. 10. 160. 1. -2 Possessed of food.

**अभिवासः, -सनम्** Covering, clothing with.

**अभिवासस्** *ind.* Over the covering or cloth.

**अभिवह** *a.* Conveying towards or near, driving near.

**अभिवहनम्** Carrying towards.

**अभिवाह्य** *pot. p.* To be carried near. **-ह्यम्** 1 Conveyance, transmission, carrying. -2 Presentation, offering; (स्वयंभूरसृजत्) हव्यकव्याभिवाह्याय Ms. 1. 94.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अभिवान्या, -अभिवान्यवत्सा** Ved. A cow suckling an adopted calf.

**अभिविक्रम** *a.* Valorous, brave; Rām. 7.

**अभिविख्यात** *a.* Universally known, renowned, famous; called, known as.

**अभिविधिः** [ अभितो विधिर्व्याप्तिः ] 1 Complete comprehension or inclusion; one of the senses of the particle आ; आङ् मर्यादाभिविध्योः P. II. 1. 13, the limit *inceptive* as opposed to the limit *conclusive* and translated by 'from', 'commencing with', 'including'; as in आबालं -आबालेभ्यः- हरिभक्तिः ( मर्यादा and अभिविधि are thus distinguished तेन विना मर्यादा, तत्सहितोऽभिविधिः ). -2 Complete pervasion, filling up or occupying completely; अभिविधौ भाव इनुण् P. III. 3. 44; also V. 4. 53 and Sk. thereon.

**अभिविनी** 1 U. To teach, instruct ( = विनी q. v. ).

**अभिविनीत** *p. p.* Well behaved, well principled. -2 Taught, instructed; वृद्धैरभिविनीतश्च Rām. 2. 1. 21; कस्यां कलायां अभिविनीते भवत्यौ M. 5. v. l. for अभियोगः दैवे निमित्ते दण्डनीत्यां च अभिविनीतम् Kau. A. 1 -3 Pious, pure, devout.

**अभिविमान** *a.* Of unlimited dimensions, an epithet of the Supreme Being; यस्त्वेतमेवम् प्रादेशमात्रमभिविमानमात्मानम् वैश्वानरमुपास्ते Chand. Up. 5. 18. 1.

**अभिविश्रुत** *a.* Widely celebrated, renowned.

**अभिवीक्ष्** 1 A. 1 To look at, view, behold, see, perceive, observe; न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् Ms. 7. 6. -2 To aim at. -3 To prove, test, examine. -4 To be affected towards, incline or lean to.

**अभिवीक्षणम्** Perceiving, beholding.

**अभिवीर** *a.* [ अभिगतो वीरैः ] Surrounded by heroes; Rv. 10. 103. 5.

**अभिवृत्** 1 A. 1 To go up to, go towards, go or come near, approach; used with or without any acc.; भरतो मन्त्रिभिः सार्धमभ्यवर्तत राजवत् Rām. 2. 91. 38. इत एवाभिवर्तन्ते ( in dramas ) are coming hitherward or in this direction; श्रावस्तीमभ्यवर्तिषि Dk. 116; तमर्च्यमारादभिवर्तमानम् R. 2. 10.; यतो यतः षट्चरणोऽभिवर्तते Ś. 1. 23 turns. -2 To attack, assail, rush upon or towards, turn towards ( inimically or to attack ); नानाप्रहरणैः क्रुद्धस्तत्सैन्यं सोऽभ्यवर्तत Rām T. 27. 40; वदनं मधुकरोऽभिवर्तते Ś. 1; अयमेकचरोऽभिवर्तते माम् Ki. 13. 3. -3 To face, encounter, stand opposite to. -4 To stretch or extend towards; दीर्घारण्यानि दाक्षिणां दिशमभिवर्तन्ते U. 2. -5 (*a*) To turn up, arise, begin. (*b*) To appear, commence; सरय्वाश्चोत्तरे तीरे राज्ञो यज्ञोऽभ्यवर्तत Rām. 1. 14. 1; break ( as day ). -6 To be, exist, chance to be. -7 To procure for one ( dat. ). -*Caus.* 1 To carry over, transport. -2 To overcome, to be master of.

**अभिवर्तिन्** *a.* Going towards, approaching, attacking &c.

**अभिवर्तनम्** Going towards, approching, attacking &c.

**अभिवर्तः** Name of a Sāman; T. Saṁhitā.

**अभिवृध्** 1 A. 1 To grow, increase, be augmented; हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते Ms. 2. 94. -2 Thrive, prosper ( of men also ); दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च Ms. 3. 259; 7. 27; Y. 1. 245. -*Caus.* 1 To increase, augment, add to; कोशम्, धनम्, प्रीतिम् &c. -2 To stretch, extend, lengthen. -3 To bring up, rear.

**अभिवृद्धिः** *f.* Increase, growth, addition; success, prosperity; राष्ट्र°; सामदण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये Ms. 7. 109; लाभ° धन° &c.

**अभिवृष्** 1. P. To rain upon, pour, sprinkle, water, bedew, cover with ( a shower of anything ), pour or shower down upon; प्रस्रवेणाभिवर्षन्ती ( भुवम् ) R. 1. 84; 10. 48, 15. 58, 99; Ki. 2. 31; बाणैर्ममभिवर्षति V. 4. -*Caus.* To sprinkle or cover with, shower upon.

**अभिवृष्ट** *p. p.* Sprinkled; rained upon, showered; मण्डूकी यदाभिवृष्टः कनिक्रन् Rv. 7. 103. 4; स्थली नवाम्भःपृषताभिवृष्टा R. 7. 69; 15. 99; V. 4. 6 also used actively; V. 4. 34.

**अभिवर्षणम्** Raining upon, watering, bedewing.

**अभिवर्षिन्** *a.* Raining upon, bedewing &c.

**अभिवेगः** Ved. Consideration, thought, determination.

**अभिव्यञ्ज्** 7. P. ( °अञ्ज् ) or *Caus.* To manifest, make clear; reveal, disclose, exhibit, display.

**अभिव्यक्त** *p. p.* 1 Manifested, revealed, declared. -2 Distinct, plain, clear; तां प्रत्यभिव्यक्तमनोरथानाम् R. 6. 12, 16. 23, Mu. 1, V. 3. **-क्तम्** *ind.* Clearly, distinctly, plainly.

**अभिव्यक्तिः** *f.* 1 Manifestation ( of a cause as an effect ); distinction, exposition, declaration, revelation, display, exhibition; सर्वाङ्गसौष्ठवाभिव्यक्तये M. 1; दूतीसंप्रेषणैर्नार्या भावाभिव्यक्तिरिष्यते S. D. 6. -2 Association, concomitance; P. VIII. 1. 15 ( Sk. = साहचर्यम् ).

**अभिव्यञ्जक** *a.* Displaying, showing, indicating; गुणाभिव्यञ्जकौ शब्दार्थौ S. D. 1.

**अभिव्यञ्जनम्** Manifesting, revealing.

**अभिव्यादानम्** 1 Suppressed sound. -2 Repetition of the same sound.

**अभिव्याधिन्** *a.* Striking, injuring greatly, hurting much; Av. 1. 91. 1.

**अभिव्याप्** 5 P. 1 To extend to, include, comprehend; अधिकारोऽयं सूत्रान्तिः इत्यभिव्याप्य Sk. -2 To pervade, surround.

**अभिव्यापक, -व्यापिन्** *a.* 1 Including, comprehending, pervading. -2 ( In gram. ) One of the three kinds of आधार q. v.; °कः आधारः P. II. 3. 36 Sk.

For Private and Personal Use Only

**उपन्यस्त** *p. p.* 1 Placed near, deposited. -2 Said, proposed, spoken. -3 Pledged, entrusted. -4 Given, communicated; पितामहेनोपन्यस्तम् (आसनम्) Bhāg. 1.17.43. -5 Brought forward as an example, adduced, hinted. **-स्तम्** The holding of hands to the chest (a skilful move in fighting); उपन्यस्तमपन्यस्तं युद्धमार्गं विशारदैः। तौ विचेरतुरन्योन्यं वानरेन्द्रश्च रावणः॥ Rām. 6. 40. 26.

**उपन्यासः** 1 Placing near to, juxta-position. -2 A deposit, pledge. -3 (*a*) Statement, suggestion, proposal; विषम उपन्यासः Mbh. on 1. 1. 1, 1. 1. 21, 46 etc. = This is a misstatement (a favourite remark of the महाभाष्यकार). पावकः खलु एष वचनोपन्यासः Ś. 5; Māl. 1, 3, 8. (*b*) Preface, introduction; निर्यातः शनकैरलीकवचनोपन्यासमालीजनः Amaru. 27; चतुरो मधुरश्चायमुपन्यासः Ak.; so शम° Ve. 5 overtures of peace. (*c*) Allusion, reference, hinting at; आत्मन उपन्यासपूर्वम् Ś. 3; M. 4; S. D. 363. -4 A precept, law. -5 A kind of peace; आत्मकार्यस्य सिद्धिं तु समुद्दिश्य क्रियेत यः। स उपन्यासकुशलैरुपन्यास उदाहृतः H. 4. 114. -6 Propitiating (प्रसादनम्).

**उपपक्षः** Ved. The shoulder, arm-pit or the hair under the arm-pit; T. Br.

**उपपक्ष्य** *a.* Near the shoulder, being on the shoulder; या उपपक्ष्याः (स्वयं स्वसः) Av. 7. 76. 2.

**उपपतिः** [उपमितः पत्या, उप गौणः पतिः] A paramour; उपपतिरिव नीचैः पश्चिमान्तेन चन्द्रः Śi. 11. 65, 15. 63; Ms. 3. 155; 4. 216, 217; Vāj. 30. 9.

**उपपातित** *a.* One guilty of an उपपातक *i. e.* a minor sin (Dānasāgara, Bibliotheca Indica 274, Fascicule I, P. 30.

**उपपथम्** *ind.* Near the road.

**उपपद्** 4 Ā. 1 To reach, come to, approach, go near; यमुनातटमुपपेदे Pt. 1; उपपद्यस्व स्वकर्मोचितां गतिम् Dk. 93. -2 To be got or obtained, fall to one's share; त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते Bg. 6. 39; 13. 18. -3 To take place, occur, happen, be produced; देवि एवमुपपद्यते M. 1 even as you say, just so; अर्थास्तस्योपपत्स्यन्ते Mb.; उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी Ś. 5. 26. -4 To be possible; कर्तव्यं वो न पश्यामि स्याच्चेत्किं नोपपद्यते Ku. 6. 61; Ms. 9. 121, 40; 10. 102; नेश्वरो जगतः कारणमुपपद्यते Ś. B. -5 To be suitable, be fit for, be adequate for, fit, suit (with loc.); क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते Bg. 2. 3; 18. 7; उपपद्यते it is fit; ते गुणाः परस्मिन् ब्रह्मण्युपपद्यन्ते Ś. B. -6 To go against, attack. -7 To put in a word or statement; इति ह विश्वामित्र उपपपाद Ait. Br. -*Caus.* 1 To bring into any state, cause to arrive or be obtained; विश्वासमुपपादिता Rām. inspired with confidence; get ready; रथमुपपादय Ve. 2. -2 To offer, present any one with (acc.), bring to; दिष्ट्या त्वमसि मे धात्रा भीतेनेवोपपादितः R. 15. 18, 14. 8; 16. 32; Ms. 9. 72, 73; 3. 96; sometimes with dat.; सर्वस्वं वेदविदुषे ब्राह्मणायोपपादयेत् Ms. 11. 76; 9. 244; or with loc.; अक्षय्योऽयं निधी राज्ञां यद्विप्रेषूपपादितम् Y. 1. 315. -3 (*a*) To cause to happen or occur, bring about; मरणमुपपादयेत् K. 36. (*b*) To accomplish, effect, cause, do, perform; यावत्तु मानुष्यके शक्यमुपपादयितुम् K. 62, 113, 120, 134; देवकार्यम् R. 11. 91; 17. 55; Me. 29. -4 (*a*) To make a

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



statement, adduce, put forward. (*b*) To justify. -5 To make good, establish, prove; कथमीश्वरं विनाशधर्मिणमुपपादयसि Prab. -6 To pronounce, declare. -7 To make fit or adequate for; कालोपपादिते क्षेत्रे Ms. 9. 36. -8 To furnish with, endow with; Kām. 11. 57; K. 2; आत्मानं प्रथमं राजा विनयेनोपपादयेत् Subhāṣ. -9 To find out, ascertain; दक्षिणाप्रवणं चैव प्रयत्नेनोपपादयेत् Ms. 3. 206. -10 To examine.

**उपपत्तिः** *f.* 1 Happening, occurring, becoming visible, appearance, production, birth; अथोपपत्तिं छलनापरोऽपराम् Śi. 1. 69 (जन्म); इष्टानिष्टोपपत्तिषु Bg. 13. 9. -2 Cause, reason, ground; प्रियेषु यैः पार्थ विनोपपत्तेः Ki. 3. 52. -3 Reasoning, argument; उपपत्तिमदूर्जितं वचः Ki. 2. 1; देवि सोपपत्तिकमभिहितम् । Nāg. 5 argumentative; giving a reason for the establishment of a matter; S. D. 482. -4 Fitness, propriety. -5 Termination, end. -6 Association, connection. -7 Acceptance, adoption; Mv. 5. -8 Ascertainment, demonstration, demonstrated conclusion; उपपत्तिरुदाहृता बलात् Ki. 2. 28. -9 (In Arith. or Geom.) Proof, demonstration. -10 A means, an expedient. -11 Assistance, support, help; ततः प्रजह्रे सममेव तत्र तैरपेक्षितान्योन्यबलोपपत्तिभिः Ki. 14. 44. -12 Doing, effecting, gaining; accomplishment; स्वार्थोपपत्तिं दुर्बलाशः R. 5. 12; तात्पर्यानुपपत्तितः Bhāṣā P.; II. 3. 111; see अनुपपत्ति. -13 Attainment, getting; अगंशयं प्राक् तनयोपपत्तेः R. 14. 78; Ki. 3. 1. -14 Religious abstraction (समाधि). -15 Accident, chance; उपपत्त्योपलब्धेषु लोकेषु च समो भव Mb. 12. 288. 11. -16 Suitability, expediency; उपपत्तिमदूर्जिताश्रयं नृपमूचे वचनं वृकोदरः Ki. 2. 1; Bhag. 4. 28. 68. -Comp.-**समः** (in logic) a kind of contradiction in which both the contradictory ascertions are supposed to be demonstrable (*e. g.* sound is eternal because it is produced; it is eternal because it is not tangible). Nyāyadarśana. -**परित्यक्त** *a.* Unproved, unreasonable, destitute of argument or proof; Raj. T.

**उपपन्न** *p. p.* 1 Obtained; secured; अतीन्द्रियेष्वप्युपपन्नदर्शनः R. 3. 41; V. 5. 15; R. 1. 60. -2 Accompanied or attended by, in company with; श्रद्धेव साक्षाद्विधिनोपपन्ना R. 2. 16, 22. -3 Coming, presenting itself; कुमारी अपूर्वपतिः पतिमुपपन्ना कौमारी भार्या Mbh. 4. 2. 13. उपपन्नाश्च सन्ध्ये द्वे व्याहरन्त्यशिवं शिवाः Rām. 6. 10. 20 -4 Right, fit, proper, suitable (with gen. or loc.); उपपन्नस्ते तर्कः V. 2; उपपन्नमिदं विशेषणं वायोः *ibid* this epithet befits the wind; उपपन्नमेतदस्मिन् राजनि Ś. 2. -5 Possible; उभयमप्यनुपपन्नम् V. 2; Ku. 3. 12. -6 Full of, endowed with, possessed of, furnished with; उपपन्नो गुणैरिष्टैः N. 1. 1; Ms. 9. 141, 244; तल्लक्षणोपपन्नः Ś. 5. -7 Demonstrated, proved. -8 Offered, presented. -9 Cured. -10 Allowed, agreed (संमत); कामकारो महाप्राज्ञ गुरूणां सर्वदानघ । उपपन्नेषु दारेषु पुत्रेषु च विधीयते ॥ Rām. 2. 101. 18. -11 One who has approached a teacher (as a pupil), approched for protection.

**उपपादक** *a.* 1 Producing, effecting. -2 Well reasoned.

**उपपादनम्** 1 Effecting, accomplishing, doing. सामान्यतः किं विषयोपपादनैः. -2 Giving, delivering, presenting. -3 Proving, demonstration, establishing by arguments; अपि त्वां न लभेत् कर्ण राज्यलम्भोपपादनम् Mb. 5. 142. 2. -4 Examination, ascertainment, exposition (of a subject).

**उपपाद्य** *a.* 1 To be effected or done. -2 To be proved or shown. -3 Coming into existence.

**उपपादुक** *a.* Self-produced. -**कः** A superhuman being, God; दिव्योपपादुका देवाः Ak.

**उपपदम्** 1 A word prefixed or previously uttered; धनुरुपपदं वेदम् Ki. 18. 44 (धनुर्वेदम्); तस्याः स राजोपपदं निशान्तम् R. 16. 40. -2 A title, a degree; epithet of respect, such as आर्य, शर्मन्; कथं निरुपपदमेव चाणक्यमिति न आर्यचाणक्यमिति Mu. 3. -3 A secondary word of a sentence, a preposition, particle &c. prefixed to a verb or a noun derived from a verb which determines or qualifies the sense of the verb; उपपदमतिङ् P. II. 2. 19; (see Sk. thereon). °तत्पुरुषः a kind of Tat. comp. in which the last member is some form of a verbal character; *e. g.* वेदविद्, ग्रामणी, आकर्णलम्बिन् &c.

**उपपरीक्षा, -क्षणम्** Investigation, examination.

**उपपर्चन, उपपृच्** *a.* Closely touching. -**नम्** Impregnation or admixture (Ved.). उपेदमुपपर्चनमासु गोषूप पृच्यताम् Rv. 6. 28. 8.

**उपपर्वन्** *n.* The day before the Parvan or change of the moon.

**उपपर्शुका** false ribs.

**उपपातः** 1 An unexpected occurrence. -2 A calamity, misfortune, accident. उपपातो हि आर्त्विसम्बद्धं द्रव्यम् । ŚB. on MS. 6. 4. 23. -3 Destruction.

**उपपातकम्** A minor sin, crime or sin of the second degree; महापातकतुल्यानि पापान्युक्तानि यानि तु । तानि पातकसंज्ञानि तन्न्यूनमुपपातकम् ॥ Y. 2. 210; Ms. 11. 66.

**उपपातकिन्** *a.* One who has committed an उपपातक. उपपातकिनस्त्वेवमेभिर्नानाविधैर्व्रतैः Ms. 11. 107, 117.

**उपपादः** The upper or dwarf pillar subordinate to a larger column.

**उपपादुक** *a.* Having shoes, shod (as a horse).

**उपपापम्** = उपपातकम् q. v. Y. 3. 285.

**उपपार्श्वः- र्श्वम्** 1 A shoulder. -2 A flank, side, -3 The opposite side. -4 The lesser ribs.

**उपपीड्** 10 P. 1 (*a*) To press down or against, hurt, injure, pain; स्तनोपपीडं परिरब्धुकामा Ki. 3. 54, 8. 16; Śi. 10. 47; पार्श्वोपपीडम्, पार्श्वयोरुपपीडम्, पार्श्वाभ्यामुपपीडम् Sk. (*b*) To oppress, devastate, lay waste; क्षुत्तृष्णोपपीडित troubled; Ms. 8. 67, 7. 195; Kām. 8. 72. -2 To eclipse.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**उपपीडनम्** 1 Pressing down, devastating, laying waste. -2 Inflicting pain, injuring; व्याधिभिश्चोपपीडनम् Ms. 6. 62, 12. 80. -3 Pain, agony.

**उपपुरम्** A suburb. **-री** The environs of a city; इमामुपपुरीं भीरु किं चिकीर्षसि शंस मे Bhāg. 4. 25. 26.

**उपपौरिक** *a.* (**-की** *f.*) Belonging to a suburb, suburban.

**उपपुराणम्** A secondary or minor Purāṇa (for an enumeration of their names, see under अष्टादशन्).

**उपपुष्पिका** Yawning, gaping.

**उपपौर्णमासि, -मासम्** *ind.* just preceding or at the time of the full-moon day.

**उपप्रदर्शनम्** Pointing out, indication.

**उपप्रदानम्** 1 Delivering over, entrusting. -2 A bribe, present; Rām. 6. 13. 7. उपप्रदानैर्मार्जारो हितकृत्प्रार्थ्यते जनैः Pt. 1. 95. -3 A tribute.

**उपप्रलोभनम्** 1 Seducing, alluring. -2 A bribe, an inducement, allurement; उच्चावचान्युपप्रलोभनानि Dk. 48.

**उपप्राणः** A secondary life-wind (belonging to the body).

**उपप्रेक्ष्** = उपेक्ष्. q. v.

**उपप्रेक्षणम्** Overlooking, disregarding.

**उपप्रैषः** Invitation, summons.

**उपप्लु** 1 Ā. 1 To float, swim; यदुपप्लवते तदृत्‌ Sk. -2 To overwhelm, cover with; उपप्लुतमघौघेन Rām. -3 To assault violently, assail: to trouble, oppress, distress; पौलस्त्योपप्लुता हरिम् R. 10. 5, 11. 64; Ms. 4.118. -4 To jump or spring upon. -5 To depart from. *-Caus.* To water.

**उपप्लवः** 1 Misfortune, evil, calamity, distress, adversity; अथ मदनवधूरुपप्लवान्तं...परिपालयाम्बभूव Ku. 4. 46; जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः पासि R. 2. 48; -2 (*a*) An unluky accident, injury, trouble; कच्चिन्न वाय्वादिरुपप्लवो वः R. 5. 6; Me. 17. (*b*) An obstacle, impediment; तौ (अर्थकामौ) हि तत्त्वावबोधस्य दुरुच्छेदावुपप्लवौ Ki. 11. 20. -3 Oppression, harassing, troubling; उपप्लवाय लोकानां धूमकेतुरिवोत्थितः Ku. 2.32. -4 Danger, fear; see उपप्लविन् below. -5 Agitation, perturbation; इन्द्रिय° K. 146. -6 A portent or natural phenomenon foreboding evil. -7 Particularly, an eclipse of the sun or moon; चन्द्रमिवोपप्लवान्मुक्तम् V. 1. 11. -8 N. of Rāhu, the ascending node, केतूपप्लवभौममन्दगतयः षष्ठे तृतीये शुभाः. -9 Anarchy. -10 N. of Śiva. -11 Doubt, scepticism (with Buddhists). -12 Loss, absence; मायया विभ्रमच्चित्तो न वेद स्मृत्युपप्लवात् Bhāg. 10. 84. 25.

**उपप्लविन्** *a.* One who has suffered a calamity, distressed, troubled; K. 208. -2 Suffering oppression; नृपा इवोपप्लविनः परेभ्यः R. 13. 7.

**उपप्लव्यम्** N. of the capital of the Matsyas; Mb.

**उपप्लुत** *p. p.* 1 Violently attacked, beset, distressed, pained &c. -2 Harassed (by Rāhu), eclipsed. -3 Marked by prodigies. -4 Moistened, watered; °**अक्ष, -नयन** weeping; कामानुजेन सहसा त उपप्लुताक्षः Bhāg. 3. 15. 31. -5 Pressed, squeezed; उपप्लुतास्तत्क्षणशोचनीयतां च्युताधिकाराः सचिवा इवाययुः Ki. 8. 30. **-ता** Morbid sensibility of the uterus, a particular disease.

**उपबन्धः** 1 Connection. -2 An affix. -3 A particular mode of sexual enjoyment; Ch. P. 44.

**उपबर्हः, -र्हणम्** 1 A pillow; चित्तिरा उपबर्हणम् Rv. 85. 7. -2 Pressing down, oppressing.

**उपबृंहणम्** Increase; A. Rām. 7. 6. 29.

**उपबृंहित** *a.* 1 Increased, magnified; य एतत्पुण्यमाख्यानं विष्णोर्वीर्योपबृंहितम् (कीर्तयेत्) Bhāg. 7. 10. 46, K. 27. 136; Dk. 42. -2 Accompanied by; तस्य त्रैकालिकी बुद्धिर्जन्ममृत्युपबृंहिता Bhāg. 11. 15. 28.

**उपबृंहिन्** *a.* Supplementary, additional.

**उपबहु** *a.* A few, a tolerable number.

**उपबाहुः** The lower arm.

**उपब्दः, -ब्दि** Sound produced at the sprinkling of Soma; noise, sound in general; ग्रावाणो घ्नन्तु रक्षस उपब्दैः Rv. 7. 104. 17 (=Av. 8. 4. 17). **-उपब्दिः** *m.* A particular venomous animal; उपब्दे पुनर्वो यन्तु Av. 2. 24. 6.

**उपभङ्गः** 1 Fleeing away, retreat. -2 A division (of a verse).

**उपभाषा** A secondary dialect

**उपभुज्** 7 U. 1 To enjoy, taste (in all senses); तपसामुपभुञ्जानाः फलानि Ku. 6. 10; नोपभुज्यते is not enjoyed, Pt. 2. 142; Ms. 12. 8. -2 To eat, drink; पयः R. 2.65, 1. 67; Bk. 8. 40; अर्धोपभुक्तेन Ku. 3. 37; Y. 3. 325. -3 To possess; स्त्रीरत्नमुपभुङ्क्ष्व Hariv. -4 To use, make use of, receive; मानसं मनसैवायमुपभुङ्क्ते शुभाशुभम् Ms. 12. 8. -5 To be useful; उप वयं नं भुञ्जामः Ch. Up. 4. 11. 2.

**उपभुक्तिः** *f.* 1 Enjoyment, use. -2 (in astr.) The daily course of a star.

**उपभोक्तृ** *a.* Enjoying, an enjoyer; Possessing, Possessor.

**उपभोगः** 1 (*a*) Enjoyment, eating, tasting; न जातु कामः कामानामुपभोगेन शाम्यति Ms. 2. 94, 8. 285; Y. 2. 171. कामोपभोगपरमाः Bg. 16. 11; प्रियोपभोग R. 12. 22. (*b*) Use, application; चरणोपभोगसुलभः S. 4. 4. -2 Enjoyment (of a woman), cohabitation; उपस्थितश्चारु वपुस्तदीयं कृत्वोपभोगोत्सुकयेव लक्ष्म्या R. 14. 24. -3 Usufruct. -4 Pleasure, satisfaction.

**उपभोगिन्** *a.* Enjoying, using.

**उपभोग्य, -भोक्तव्य, -भोज्य** *pot. p.* To be enjoyed, used or eaten; असूत सा नागवधूपभोग्यम् Ku. 1. 20;

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किंचित्कालोपभोग्यानि यौवनानि धनानि च Pt. 2. 117; अस्माकमुपभोग्यो भविष्यति Pt. 1. will become our prey. **–ग्यम् 1** Any object of enjoyment. **–2** Food. **–3** Expense incurred for protection (on food, clothing, education &c.); व्ययीकृतं रक्षणार्थमुपभोग्यं तदुच्यते Śukra. 2. 335.

**उपभोगिन्** *a.* Eating, enjoying.

**उपभूषणम्** A minor or inferior ornament; implement.

**उपभृ** 3 U. To bear; अविचलं शिखरैरुपबिभ्रतं ध्वनितसूचितमम्बुमुचां चयम् Ki. 5. 12.

**उपभृत्** *f.* [उप-भृ-आधारे क्विप्] A round cup used in sacrifices, made of the wood of the Banian tree; a sacrificial vessel: जुहूर्दाधार द्यामुपभृदन्तरिक्षम् Av. 18. 4. 5.

**उपभृत** *a.* Procured for, brought near; शिष्याग्रोपभृतं तेजो यत एतत्समुद्यमः Bhāg. 8. 15. 29.

**उपभेदः** subdivision.

**उपम** *a.* Ved. **1** Highest, uppermost. **–2** Most excellent, best, eminent, first. **–3** Nearest.

**उपमश्रवस्** *a.* **1** Of highest fame, **–2** *m.* N. of a son of Kuruśravaṇa and grandson of Mitrātithi; कविं कवीनामुपमश्रवस्तमम् Rv. 2. 23. 1.

**उपमन्त्र्** 10 Ā. **1** To invoke, call, invite. **–2** To address, call to; उपमन्त्रयते स हिंकारः Ch. Up. 2. 13. 1. स्त्री पुंसोपमन्त्रिता. **–3** To persuade, conciliate. प्रियामनुगतः कामी वचोभिरुपमन्त्रयन् Bhāg. 9. 18. 35.

**उपमन्त्रणम् 1** The act of addressing, inviting, calling. **–2** Persuading, coaxing (उपच्छन्दनम्); P. I. 3. 47.

**उपमन्त्रिन्** *a.* Inviting, persuading; अश्वो वोळ्हा सुखं रथं हसनामुपमन्त्रिणः Rv. 9. 112. 4. *m.* **1** A messenger; स्मररुज उपमन्त्रिन्भण्यतामन्यवार्ता Bhāg. 10. 47. 19. **–2** A subordinate counsellor; Bhāg. 10. 71. 29.

**उपमन्थनी** A staff for stirring; औदुम्बर्यां उपमन्थन्यौ Bṛi. Up. 6. 3. 13.

**उपमन्थितृ** *a.* Ved. Stirring; Vāj. 30. 12.

**उपमन्यु** *a.* Ved. **1** Understanding, intelligent. **–2** Zealous, striving after. **–3** (*m.*) N. of the pupil of Āyoda-dhaumya, who aided Śiva in the propagation of his doctrine and received the ocean of milk from him.

**उपमा** 2 P., 3, 4. Ā. **1** To compare, liken; तेनोपमीयेत तमालनीलम् Śi. 3. 8; स्तनौ मांसग्रन्थी कनककलशावित्युपमितौ Bh. 3. 20. **–2** To give, grant (Ved.).

**उपमा 1** Resemblance, similarity, equality; स्फुटोपमं भूतिसितेन शम्भुना Śi. 1. 4, 17. 69; Ki. 6. 23; इहोपमा सताम् Pt. 2. 8 the same is the case with the good. **–2** (In Rhet.) Comparison of two objects different from each other, simile, comparison; साधर्म्यमुपमा भेदे K. P. 10; or सादृश्यं सुन्दरं वाक्यार्थोपस्कारकमुपमालंकृतिः R. G.; or उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः। हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते॥ Chandr. 5. 3; Kāv. 2. 14; उपमा कालिदासस्य Subhāṣ. (Daṇḍin mentions 32 varieties of उपमा; see Kāv. 2. 15–50; as to words expressive of उपमा see 2. 57–65); see K. P. 10 *ad loc.* also. **–3** The standard of comparison (उपमान); यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता Bg. 6. 19; (आत्मानमुपमां कृत्वा स्वेषु दारेषु रम्यताम् Rām. 5. 21. 8; see °द्रव्य below; mostly at the end of comp., 'like', 'resembling'; चुचुम्बे न चुम्बोपमः R. 1. 47; so स्वर्गोपम, अमरोपम, अनुपम &c. **–4** A likeness (as a picture, portrait &c. **–5** Heresy, irreligious doctrine; विधर्मः परधर्मश्च आभास उपमा छलः। अधर्मशाखाः पञ्चेमा धर्मज्ञोऽधर्मवत्त्यजेत्॥ Bhāg. 7. 15. 12. **–Comp. –द्रव्यम्** any object used for a comparison; सर्वोपमाद्रव्यसमुच्चयेन Ku. 1. 49. **–रूपकम्** a figure in Rhetoric being a mixture of simile and metaphor. **–व्यतिरेकः** A particular figure combining comparison and contrast.

**उपमातृ** *m.* An image-maker, a portrait-painter.

**उपमानम् 1** Comparison, resemblance; जातास्तदूर्वोरुपमानबाह्याः Ku. 1. 36. **–2** The standard of comparison, that with which anything is compared; one of the four requisites of an उपमा; उपमानमभूद्विलासिनां Ku. 4. 5; उपमानस्यापि सखे प्रत्युपमानं वपुस्तस्याः V. 2. 3; Śi. 20. 49. **–3** (In Nyāya Phil.) Analogy, recognition of likeness, considered as one of the four kinds of pramāṇas or means of arriving at correct knowledge. It is defined as प्रसिद्धसाधर्म्यात् साध्यसाधनम्; or उपमितिकरणमुपमानं तच्च सादृश्यज्ञानात्मकम् Tarka. K. तव विश्वसनीयं यो राक्षसानां रणाजिरे। एतेनैवोपमानेन नित्यं जिह्मा हि राक्षसाः॥ Rām. 6. 50. 54. **–4** A particle of comparison. **–Comp. उपमेयभावः** relation between the subject of comparison and the standard of comparison. **–चिन्तामणिः** *m.* N. of a philosophical work.

**उपमित** *p. p.* P. II. 1. 56. Compared, likened, similar &c.

**उपमितिः** *f.* **1** Resemblance, comparison, similarity; पल्लवोपमितिसाम्यसपक्षम् S.D.; तदाननस्योपमितौ दरिद्रता N. 1. 24. **–2** (In Nyāya Phil.) Analogy, inference, deduction, knowledge of things derived from analogy, a conclusion deduced by means of an उपमान; प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे Bhāṣā P. 52. **–3** A figure of speech = उपमा q. v. **–4** A likeness, picture.

**उपमेय** *pot. p.* Fit to be likened or compared, comparable with; (with instr. or in comp.); भूयिष्ठमासीदुपमेयकान्तिः मयूरपृष्ठाश्रयिणा गुहेन R. 6. 4; 18. 34, 37; अन्तःपुरं चैककुलोपमेयम् Ku. 7. 2; Ch. P. 29 v. l. **–यम्** The subject of comparison, that which is compared उपमानोपमेयत्वं यदेकस्यैव वस्तुनः Chandr. 5. 7, 9. **–Comp. –उपमा** a figure of speech in which the उपमान and उपमेय are compared to each other with a view to imply that the like of them does not exist; reciprocal comparison;

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विपर्यास उपमेयोपमानयोः K. P. 10; *e. g.* कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः । &c.

**उपमातिः** *f.* 1 Comparison. -2 Killing. -3 Approaching with a prayer, addressing. **-तिः** *m.* Granting wealth (Sāy.), approaching in a friendly way; affable, an epithet of Agni (B. and R.). **-Comp. -वनि** *a.* destroyer of an enemy (Sāy.); मा नोऽहिर्बुध्न्यो रिषे धादस्माकं भूदुपमातिवनिः Rv. 5. 41. 16. one who receives addresses in a friendly way (?).

**उपमीमांसा** Ved. Deliberation, investigation, consideration.

**उपमातृ** *f.* [उपमिता माता उप गौणे वा | 1 'A second mother', wet nurse. -2 A near female relative; मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा । श्वश्रूः पूर्वजपत्नी च मातृतुल्याः प्रकीर्तिताः Śabdak.

**उपमाद** *a.* Giving delight. **-दः** Enjoyment, delight.

**उपमारणम्** Ved. Submerging (in water).

**उपमास्य** *a.* Occurring every month, monthly (Ved.); तस्मान् पितृभ्यो मास्युपमास्यं ददति Av. 8. 10. 19. **-स्यम्** The Śrāddha ceremony to be performed every month.

**उपमित्** *a.* Ved. 1 Dug up, excavated. -2 Placing near. *-f.* A prop, stay, pillar (स्थूणा); स्थूणेव जनाँ उपमिद् ययन्थ Rv. 1. 59. 1.

**उपमृद्** 9 U. 1 To crush, bruise, dash to pieces, destroy, kill; पिण्डाकृतिमुपमृद्य घटिकाः क्रियन्ते Mbh. 1. 1. 1; यामिकाननुपमृद्य N. 5. 110. -2 To rub down. -3 To pass through.

**उपमर्दः** 1 Friction, rubbing or pressing down, crushing under one's weight; अन्यासु तावदुपमर्दसहासु भृङ्ग लोलं विनोदय मनः सुमनोलतासु S. D. (where उ° also means rough handling or enjoyment). -2 Destruction, injury, killing. -3 Reproach, abuse, insult, harsh or insulting treatment; Mk. 1. -4 Unhusking. -5 Refutation of a charge. -6 Stirring, shaking.

**उपमर्दक** *a.* Crushing, destroying. **-कः** Refutation of a charge.

**उपमर्दनम्** Suppression, oppression.

**उपमेखलम्** *ind.* On the slope or side; Ki. 7. 23

**उपमेतः** The tree Vatica Robusta, Śāla tree (Mar. साग).

**उपयज्** *m.* (P. III. 2. 73) N. of eleven additional formulas (enumerated in Vāj. 6. 21.) at a sacrifice; एकादशोपयजः यदुपजन्तमुपयजति तस्मादुपयजो नाम Śat. Br.

**उपयष्टृ** *m.* The priest who utters the above formulas; Śat. Br. 3. 8. 5. 5.

**उपयाजः** Additional formulas at a sacrifice; Mb. 2.

**उपयन्त्रम्** A minor surgical instrument, a secondary application of any kind.

**उपयम्** 1 U. 1 To marry, take a wife (Ā. in this sense); भवान् मिथः समयादिमामुपायंस्त S. 5; आत्मानुरूपां विधिनोपयेमे Ku. 1. 18; R. 14. 87; Śi. 15. 27; Ms. 3. 11; Bk. 4. 20, 28; 7. 101. -2 (*a*) To seize, hold; उपयच्छ शूर्पम् Av.; उपायंस्त महास्त्राणि Bk. 15. 21; शस्त्राण्युपायंसत जित्वराणि 1. 16. (*b*) To take, receive, accept; कोपात्काश्चित्प्रियैः प्रत्तमुपायंसत नासवम् Bk. 8. 33. -3 To show, indicate (सूच्); मोपयच्छं भयम् Bk. 7. 101. -4 To lie under, support, prop up (Ved.). -5 To go to (a woman); एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत्तु बुद्धिमान् Ms. 11. 172. -6 To curb, restrain.

**उपयन्तृ** *m.* A husband; अथोपयन्तारमलं समाधिना Ku. 5. 45; R. 7. 1; Śi. 10. 45.

**उपयमः** 1 Marriage, marrying; कन्या स्वजातोपयमा सलज्जा नवयौवना S. D. -2 Restraint. -3 A support; stay.

**उपयमनम्** 1 Marrying, taking a wife; P. I. 2. 16. विभाषोपयमने. -2 Restraining, curbing. -3 Placing down the fire -4 Support. **-नी** 1 Any support of stone for holding fire-wood; उपयमनीरुपकल्पयन्ति Śat. Br. -2 A sacrificial ladle.

**उपयामः** 1 A kind of vessel in a sacrifice. -2 The formulas uttered in taking out the Soma juice by means of a ladle (Vaj. 7. 4 seqq.) -3 Marriage (see उपयम).

**उपया** 2 P. 1 To approach, go towards, reach; उपयामगृहीतोऽसि Ts. 1. 4. 15. येन मामुपयान्तिते Bg. 10. 10. so पुरम्, गतिम्, नयनम्, पदवीम्; दुर्मन्त्रिणं कमुपयान्ति न नीतिदोषाः H. 3. 110. -2 To attain to a particular state, meet with &c.; तनुताम्, मृत्युम्, रुजम्, पाकम्, प्रसादम् &c.

**उपयात** *p. p.* Come, arrived. **-तम्** Arrival, return.

**उपयानम्** 1 Approaching, coming near; उपयानापयाने च स्थानं प्रत्यपसर्पणम् । सर्वमेतद्रथस्थेन ज्ञेयं रथकुटुम्बिना ॥ Rām. 6. 104. 20. -2 Acquisition, obtaining; हरोपयाने त्वरिता बभूव Ku. 7. 22.

**उपयायिन्** *a.* Coming towards.

**उपयाच्** 1 U. To wish or ask for, solicit; अक्षमालामुपयाचितुम् K. 151.

**उपयाचक** *a.* One who asks or solicits, suitor, beggar.

**उपयाचनम्** Soliciting, begging, approaching with a request or prayer.

**उपयाचित** *p. p.* Begged, requested, solicited. त्वया पुरस्तादुपयाचितो यः R. 13. 53. **-तम्** 1 A request or prayer in general. -2 A present promised to a deity for the fulfilment of a desired object and generally to propitiate her, (the present may be an animal or even a human being); निक्षेपी म्रियते तुभ्यं प्रदास्याम्युपयाचितम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Pt. 1. 14; 2. 50; अद्य मया भगवत्याः करालायाः प्रागुपयाचितं स्त्रीरत्नमुपहर्तव्यम् Mal. 5; दीयते यत्तु देवेभ्यो मनोराज्यस्य सिद्धये। उपयाचितकं दिव्यं दोहदं तद्विदुर्बुधाः॥ -3 A request or prayer to a deity for the accomplishment of a desired object; K. 330.

**उपयाचितकम्** = उपयाचित above; सिद्धायतनानि कृतविविधदेवतोपयाचितकानि K. 64.

**उपयापनम्** 1 The act of causing to come near, leading near. -2 A marriage; पुत्राणां दुहितॄणां च काले विध्युपयापनम्। दारैर्वरैस्तत्सदृशं कल्पयन्तं विभूतिभिः Bhāg. 10. 69. 32.

**उपयुज्** 7 Ā. 1 To use, employ, apply; षाड्गुण्यमुपयुञ्जीत Śi. 2. 93; षडुपायुङ्क्त समीक्ष्य तत्फलम् R. 8. 21; M. 5. 12; अनुपयुज्यमान useless, good for nothing, Ś. 7; U. 4. -2 To enjoy, taste; पय उपयुज्य Me. 13 v. l.; फलान्युपायुङ्क्त स दण्डनीतेः R. 18. 46; Bk. 8. 39; -3 To devote or attach oneself to; न मूर्खैरुपयुज्यते is not loved Pt. 2. 23; न वै प्राज्ञा गतश्रीकं भर्तारमुपयुञ्जते Subhāṣ. -4 To yoke or harness (as horses to a carriage); यामन्यामन्नुपयुक्तं वहिष्ठम् Av. 4. 23. 3. -5 To appropriate, consume, eat; राजा तत् (धनम्) उपयुञ्जानश्चौरस्याप्नोति किल्बिषम् Ms. 8. 40. -*pass.* 1 To be used or applied. -2 To be fit or proper; तस्येयमुपयुज्यते Bhāg. -3 To be of use, be taken into account; तेजसा सह जातानां वयः कुत्रोपयुज्यते Pt. 1. 328.

**उपयुक्त** *p. p.* 1 Attached &c. -2 Suited, appropriate, fit, right, proper. -3 Worthy, serviceable, useful. -4 Eaten, consumed. -**क्तः** A subordinate officer; Kau. A. 2. 5; Bhāg. 9. 2. 14; उपयुक्तोदकां भग्नां प्रपां निपतितामिव Rām. 2. 114. 15.

**उपयोगः** 1 Employment, use, application, service; ओषधाश्वविहाराणामुपयोगः सुखावहः Madh. N. उपयोगं गम् or व्रज् to be used or employed, serve; व्रजन्ति ... अनङ्गलेखक्रिययोपयोगम् Ku. 1. 7. -2 Administration of medicines, or their preparation. -3 Fitness, suitableness, propriety. -4 Contact, proximity. -5 Any act contributing to the fulfilment of a desired object. -6 Good conduct, observing established customs. -7 Food; गते च दुर्वाससि सोऽम्बरीषो द्विजोपयोगातिपवित्रमाहरत् Bhāg. 9. 5. 24.

**उपयोगिन्** *a.* 1 Employing, using. -2 Conducive or contributing to, serviceable, useful. -3 Appropriate, fit, proper. -4 Favourable, propitious. -5 Touching.

**उपयोगिता** or °**त्वम्** 1 Usefulness, utility. -2 Fitness, propriety. -3 Occasion, need. -4 Favour.

**उपयोजनम्** 1 Harnessing a horse, Ait. Br. 5. 30. 6. -2 A team.

**उपयोज्य** *a.* To be employed, used or applied.

**उपर** *a.* Ved. 1 Being below, under. -2 Posterior, later. -3 Nearer. -**रः** 1 The lower stone on which the Soma plant is laid that it may be ground by means of other stones (ग्रावन्); त्वचं पृञ्चन्त्युपरस्य योनौ Rv. 1. 79. 3. -2 The lower part of the sacrificial post. -3 A cloud. -4 A region, direction.

**उपरताति** *ind.* In the proximity, near to; विश्वां अर्य उपरताति वन्वन् Rv. 7. 48. 3; 1. 151. 5.

**उपरञ्ज्** 4 U. or in *pass.* To be red; to be eclipsed; उपरज्यते भगवान् चन्द्रः Mu. 1. —*Caus.* 1 To colour, tint, dye. -2 To affect, grieve, distress.

**उपरक्त** *p. p.* 1 Afflicted, overtaken by calamity, distressed. -2 Eclipsed; K. 314. -3 Tinged, coloured; द्विषद्विद्वेषोपरक्ताङ्गसङ्गिनीः Śi. 2. 18. -**क्तः** 1 The sun or moon in eclipse. -2 Rāhu.

**उपरज्य** *ind.* Darkening, obscuring; तमश्चन्द्रमसीवेदमुपरज्यावभासते Bhāg. 4. 29. 70.

**उपरञ्जक** *a.* 1 Dyeing. -2 Affecting, influencing.

**उपरागः** 1 An eclipse of the sun or moon; उपरागान्ते शशिनः समुपगता रोहिणी योगम् Ś. 7. 22; Śi. 20. 45. -2 Hence, Rāhu or the ascending node. -3 Redness, red colour, colour; कोपोपरागजनिताम् Ratn. 3. 14; Mk. 4; कलहकोप° Mal. 9. -4 A calamity, affliction, injury; blighting influence; मृणालिनी हैममिवोपरागम् R. 16. 7. -5 Misbehaviour, ill-conduct. -6 Reproach, blame, abuse.

**उपरक्षः** A body-guard.

**उपरक्षणम्** A guard, an out-post.

**उपरत्नम्** [उपमितं रत्नेन उप गौणे वा] A secondary or inferior gem; उपरत्नानि काचश्च कर्पूरोश्मा तथैव च। मुक्ताशुक्तिस्तथा शङ्ख इत्यादीनि बहून्यपि॥ गुणा यथैव रत्नानामुपरत्नेषु ते तथा। किं तु किंचित्ततो हीना विशेषोऽयमुदाहृतः॥

**उपरथ्या** A bye-road, minor road; तथा रथ्योपरथ्याश्च Rām. 5. 53. 21.

**उपरम्** 1 P. (Sometimes Ā. also) 1 To cease, end, terminate; संगतावुपरराम च लज्जा Ki. 9. 44, 13. 69; इत्युक्त्वोपरराम; युद्धमुपारमत् ceased &c. -2 To cease or desist from, stop (oft. with pres. part.); व्यापादयन्नोपरराम Pt. 1; or with abl.; Bg. 2. 35; Bk. 8. 54; 9. 51; or with inf.; Ki. 4. 17; or by itself; Bk. 8. 55. -3 To be quiet or calm; यत्रोपरमते चित्तम् Bg. 6. 20. -4 To await, wait for; Śat Br. 2. 2. 1-2; 3. 8. 2-29. -5 To make quiet (= *Caus*). -*Caus.* To cause to cease, stop, make quiet or still.

**उपरत** *p. p.* 1 Stopped, ceased; उपरतान्यस्मिन् कुले व्रतानि Mbh. on P. I. 4. 110; रजस्युपरते Ms. 5. 66. -2 Dead; अद्य दशमो मासस्तातस्योपरतस्य Mu. 4. -3 Withdrawn or retired from; रणात्, कलहात् &c. भयाद्रणादुपरतम् Bg. 2. 34. -4 One who is disgusted with the world and has retired from it. -**Comp.** -**अरि** *a.* having no foe. -**कर्मन्** *a.* ceasing from works, not relying on worldly acts. -**विषयाभिलाष** *a.* one who has renounced all desire for worldly things.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**-शोणिता** (a woman) whose menses have ceased. **-स्पृह** *a.* void of desire, indifferent to worldly attachments or possessions.

**उपरतिः** *f.* 1 Ceasing, stopping. -2 Death. -3 Abstaining from sexual enjoyment. -4 Indifference. -5 Abstaining from prescribed acts; the conviction that ceremonial acts are futile and ceasing to rely on them. -6 Intellect.

**उपर (रा) मः** 1 Ceasing, stopping; ending; भवप्रवाहोपरमं पदाम्बुजम् Bhāg. 1. 8. 36. -2 Abstaining from, giving up. -3 Death.

**उपरमणम्** 1 Abstaining from sexual pleasures. -2 Refraining from ceremonial acts. -3 Ceasing, stopping.

**उपरम्भ्** P. To cause to resound; जातहर्ष उपरम्भति विश्वम् Bhāg. 10. 35. 12.

**उपरवः** A sort of hole used in the extraction of Soma juice (सोमाभिषवाङ्गो गर्ताकारो देशभेदः); name of certain holes which increase the sound of the stones when Soma juice is being extracted); cf. also पीठपादचतुष्टयाकारो बाहुमात्रो गर्तभेद उपरवः। ŚB. on MS. 11. 4. 52.

**उपरावः** A near sound; P. III. 3. 22. उपसर्गे रुवः.

**उपरसः** 1 A secondary mineral, (red chalk, bitumen, माक्षिक, शिलाजित &c). -2 A secondary passion or feeling. -3 A subordinate flavour.

**उपराजः** A viceroy, one inferior to the ruling authority; P. IV. 2. 116. उपराजेव राजर्द्धिं ज्ञातिर्न सहते सदा Mb. 12. 80. 32.

**उपरि** *ind.* 1 As a separable preposition (usually with gen., rarely with acc. or loc.) it means (*a*) Above, over, upon, on, towards; (opp. अधः) (with gen.); गतमुपरि घनानाम् Ś. 7. 7; अवाङ्मुखस्योपरि वृष्टिः पपात R. 2. 60; अर्कस्योपरि Ś. 2. 9; प्रासादानाम् Māl. 7. 5; U. 5. 2; Śi. 16. 9. 12. 37; so °स्थापनम्, °स्थित &c.; with loc. उपर्येव स लङ्कायाम् Rām.; or acc. यन्त्राण्युपरि यन्त्राणि *ibid*; oft. at the end of comp.; रथ°, तरुवर°, तद्°. (*b*) At the end of, at the head of; सर्वानन्दानामुपरि वर्तमाना K. 158. (*c*) Beyond, in addition to; पणस्योपरि संस्थाप्य व्ययम् Y. 2. 253; भुक्तस्योपरि Suśr. (*d*) In connection with, with regard to, towards, upon; परस्परस्योपरि पर्यचीयत R. 3. 24; Śānti. 3. 23; तस्योपरि क्रुद्धः, ममोपरि दुष्टबुद्धिः &c.; तवोपरि प्रायोपवेशनं करिष्यामि on your account. (*e*) After; मुहूर्तादुपरि उपाध्यायश्चेदागच्छेत् P. III. 3. 9 Sk. उपरि joined to उपरि (with acc. or gen. or by itself) means (*a*) Just above; लोकानुपर्युपर्यास्ते माधवः Vop. (*b*) higher and higher, far high, high above; उपर्युपरि सर्वेषामादित्य इव तेजसा Mb. -2 (As a separable adverb) It means (*a*) high above, upon, towards the upper side of (opp. अधः); त्रिदशानिवनिहत्याशु स्वयं स्थास्याम्यथोपरि Rām. 7. 29. 6. उपर्युपरि पश्यन्तः सर्व एव दरिद्रति H. 2. 2; so उपरि या; °स्थापन, °स्थित &c.; oft. in comp. स्वमुद्रोपरिचिह्नितम् Y. 1. 319. (*b*) Besides, in addition, further, more; शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः Mb. (*c*) Afterwards; यदा पूर्वं नासीदुपरि च तथा नैव भविता Śānti. 2. 7; सर्पिः पीत्वोपरि पयः पिबेत् Suśr.; उपर्युपरि more and more, repeatedly, continuously. [cf. Zend *upairi*, *upara*; Gr. *huper*; L. *super*; Old Germ. *obar*; Germ. *uber*; Eng. *over*; Hind. *upar*]. -**Comp.** **-आसनम्** sitting on high. **-करः** A tax paid by temporary tenants. **-काण्डम्** The third division of the Maitrāyaṇī Saṁhitā. **-गत** *a.* gone up, ascended. **-चर** *a.* moving above (as a bird). **-रः** N. of the king Vasu. **-चित** *a.* piled over or above. **-ज** *a.* produced above, elevated, high. **-तन, स्थ** *a.* upper, higher. **-तलम्** Upper part; उपरितलनिपातितेष्टकः Mk. 3. 22. **-प्रुत** *a.* Ved. coming from above; Vāj. 7. 3. **-बुध्न** *a.* Ved. raised above the ground; Rv. 10. 73. 8. **-बृहती** A variety of बृहती metre. **-भागः** the upper portion or side. **-भावः** being above or higher. **-भूमिः** *f.* the ground above. **-मर्त्यम्** *ind.* Ved. above men; अवो देवमुपरिमर्त्यं कृधि Rv. 8. 19. 12. **-शयनम्** a place of rest. यदुपरिशयनमाहरन्ति स्वर्गमेव तेन लोकमवरुन्द्धे Av. 9. 6. 9. **-श्रेणिक** *a.* being in the upper line or series. **-ष्ठ (स्थ)** *a.* Above, staying up; पर्वतस्योपरिष्ठस्य कर्मेदं कस्यचिद्भवेत् Rām. 7. 16. 5. **-सद्** *a.* lying or sitting above; Vāj. 9. 35. (*m.*) a class of gods. **-सद्म** sitting above. **-स्थायिन्** a. Standing higher, prominent. **-स्पृश्** Reaching above, elevated; वसवो रुद्रा आदित्या उपरिस्पृशम् Rv. 10. 128. 9. **कः** A provincial governor.

**उपरिष्टात्** *ind.* [cf. उपर्युपरिष्टात् P. V. 3. 31] 1 As an adverb it means (*a*) Over, above, from above, on high; परहितकरणे नोपरिष्टान्न चाधः Bh. 3. 131; Y. 1. 106. (*b*) Further or later on, afterwards; कल्याणावतंसा हि कल्याणसंपदुपरिष्टाद् भवति Māl. 6; इदमुपरिष्टाद् व्याख्यातम् in the sequel. (*c*) Behind (opp. पुरस्तात्); पुरस्ताच्चोपरिष्टाच्च अद्भिः परिदधाति Ch. Up. 5. 2. 2. -2 (As a preposition) it means (*a*) Over, upon (with gen., rarely acc.); स्फुटतरमुपरिष्टादल्पमूर्तेर्ध्रुवस्य स्फुरति सुरमुनीनां मण्डलं व्यस्तमेतत् Śi. 11. 3. (*b*) Down upon. (*c*) Behind (with gen.) -**Comp.** **-ज्योतिष्मती** N. of a Vedic metre consisting of 43 or 44 syllables. **-ज्योतिः** *f.* a verse of the Triṣṭubh metre, the last line of which consists of eight syllables. **-बृहती** N. of a Vedic metre having four Pādas, the first of which contains 12 syllables, each of the three others having only eight.

**उपरीतकः** A particular mode or posture of sexual enjoyment; (also called विपरीतक).

**उपरुध्** 7 U. 1 To obstruct, hinder, interrupt, stop; मा मोपरोत्सीरिति मा सृजैनम् Kaṭh. Up. 1. 21. उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिम् Ś. 4. 15. Ve. 3. 8; उपरुध्यते तपोऽनुष्ठानम् Ś. 4; V. 5; पथ्यमुपरुन्धताम् Y. 2. 250; to detain; अन्याय्यमुपरोद्धुम् V. 5. -2 (*a*) To disturb, trouble; पौरास्तपोवनमुपरुन्धन्ति Ś. 1. (*b*) To press, trouble

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



with a request; अस्युत्सेह संप्रति नोपरोद्धुम् R. 5. 22. -3 To overcome, subdue; भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः R. 4. 83. -4 To besiege (an enemy, town &c.); उपरुध्यारिमासीत Ms. 7. 195; Kām. 13. 67; उपरुद्धं कुसुमपुरम् Mu. 2. -5 To lock up, pen, confine; व्रजोपरोधं गाः स्थापयति Sk. -6 To conceal, hide; नेत्रक्रमेणोपरुरोध सूर्यम् R. 7. 39. -7 To cast off, repudiate, reject; ज्येष्ठपुत्रमुपारुधत् Rām.

**उपरुद्ध** *p. p.* 1 Obstructed, impeded, stopped, confined, captive; वृत्तं हि राज्ञामुपरुद्धवृत्तम् R. 18. 18. -2 Covered, spread, concealed. -3 Protected, favoured. -4 Besieged, locked up. **-द्धः** A captive; R. 18. 18.

**उपरोधः** 1 Obstruction, impediment, obstacle; शरत्प्रमृष्टाम्बुधरोपरोधः R. 6. 44; Śi. 20 74; सकौतुक° विनयम् U. 4. -2 Disturbance, trouble, molestation; तपोवननिवासिनामुपरोधो मा भूत् Ś. 1. 5, 6; अनुग्रहः खल्वेष नोपरोधः V. 3; उपरोधःसह्यताम् *ibid.*; detention; किं राजर्षेरुपरोधेन Ś. 3. -3 Opposition, refusal, check, restraint. -4 Covering, surrounding, blocking up. -5 Binding, tying, seizing. -6 Protection, favour. बलवता विगृह्योपरोधहेतवः Measures conducive to peace; Kau. A. 7. -7 sublation, dropping; आनर्थक्याद्धि प्राकृतस्योपरोधः स्यात् । MS. 8. 4. 15. **-Comp. -कारिन्** *a.* impeding, obstructing.

**उपरोधक** *a.* 1 Obstructing, obstructor; रामोऽभ्येति पुरीं लङ्कामस्माकमुपरोधकः Rām. 6. 6. 16. -2 Covering, surrounding -3 Favouring. **-कम्** An inner room, a private apartment.

**उपरोधनम्** Obstruction, impediment &c.; see उपरोध.

**उपरोधिन्** *a.* Obstructing, impeding; सुखानि सोऽभुङ्क्तसुखोपरोधि R. 18. 18.

**उपरूपकम्** [उपगतं रूपकं दृश्यकाव्यं सादृश्येन] A drama of an inferior class, of which 18 kinds are enumerated; नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् । प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ॥ संलापकं श्रीगदितं शिल्पकं च विलासिका । दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च ॥ S. D. 276.

**उपलः** 1 A stone, rock; उपलशकलमेतद् भेदकं गोमयानाम् Mu. 3. 15; कान्ते कथं घटितवानुपलेन चेतः Ś. Til. 3; Me. 19; Ś. 1. 14. -2 A precious stone, jewel. Y. 3. 36. 'उपलः प्रस्तरे मणौ' इति विश्वः. -3 Sand (Ved.). -4 A cloud. -5 A ball thrown from some artifice (as gun); कपाटयन्त्रदुर्धर्षा बभूवुः सगुडोपलाः Mb. 3. 284. 4. **-ला** 1 Refined sugar, (उपलसिता Sugarcandy). -2 The upper and smaller millstone which rests on the Driṣad. [cf L. *opalus.*] **-Comp. -प्रक्षिन्** *a.* Grinding grain upon millstones; कारुरहं ततो भिषगुपलप्रक्षिणी नना Rv. 9. 112. 3.

**उपलकः** A stone.

**उपलक्ष्** 10 P. 1 To look at, observe, behold, mark; आसन्नवर्तिजन उपलक्षयति K. 197; सम्यगुपलक्षितं भवत्या Ś. 1. -2 To regard or consider; लोकप्रवादः सत्योऽयं पण्डितैरुपलक्षितः Rām. -3 To mark, put a sign upon; आदिमध्यावसानेषु भवच्छब्दोपलक्षिता Y. 1. 30; 2. 151; Kām. 7. 47. -4 To denote, designate, describe. -5 To imply in addition; नक्षत्रशब्देन ज्योतिःशास्त्रमुपलक्ष्यते Kull. on Ms. 3. 162. -6 To mind, have in view; Kām. 16. 40.

**उपलक्षक** *a.* 1 Observing; marking; परचित्त° -2 Designating, indicating (as a word).

**उपलक्षणम्** 1 Looking at, beholding, observing, marking, ascertainment; वेलोपलक्षणार्थम् Ś. 4. -2 A mark, characteristic or distinctive feature; उपलब्धमुपलक्षणम् V. 4, 4. 33; उपलक्षणे तृतीया Sk. -3 Designation; प्राद्युपलक्षणम् Sk. -4 Implying something that has not been actually expressed, implication of something in addition or any similar object where only one is mentioned; synecdoche of a part for the whole, of an individual for the species, or of a quality for that in which the quality exists (स्वप्रतिपादकत्वे सति स्वेतरप्रतिपादकत्वं); मन्त्रग्रहणं ब्राह्मणस्याप्युपलक्षणम् P. II. 4. 80 Sk.; so अस्ति नास्तेरुपलक्षणम् &c.

**उपलक्षित** *p. p.* 1 Observed, marked, comprehended, implied, metaphorically expressed &c. -2 Understood, comprehended. -3 Characterized.

**उपलक्ष्य** *pot. p.* 1 Inferable. -2 To be described, designated &c. **-क्ष्यः** 1 A prop, stay, support. -2 An asylum, shelter. -3 An inference.

**उपलधिप्रियः** [बालधिः प्रियोऽस्य पृषो॰] A kind of antelope (चमर).

**उपलभ्** 1 Ā. 1 To know, understand, see, perceive (directly); सव्यदक्षिणयोर्यत्र विशेषो नोपलभ्यते Pt. 1. 76; अन्या प्रतिक्रिया नोपलभ्यते K. 152. -2 To ascertain, find out, learn, know; ब्रूहि यदुपलब्धम् U. 1; तत्त्वत एनामुपलप्स्ये Ś. 1; Mv. 7. 30; R. 12. 60; Bk. 3. 27; K. 159; M. 41, 3. 6, 4. 6. -3 To get, obtain, acquire, enjoy, experience (happiness &c.); उपलब्धसुखः Ku. 4. 42. experiencing; कथमुपलभे निद्राम् V. 2. 10 enjoy; इदानीं स्मृतिरुपलब्धा Mu. 2 now I recollect; Ms. 11. 17; R. 8. 82, 10. 2, 18. 21. -4 To conceive, become pregnant. -*Caus.* 1 To cause to get; बुभुजे च श्रियं स्वृद्धां द्विजदेवोपलम्भिताम् Bhāg. 8. 15. 37. -2 To produce, bring about.

**उपलब्ध** *p. p.* 1 Gained, obtained. -2 Conceived. -3 Perceived, understood, known, guessed. **-Comp. -अर्थ** *a.* having the meaning understood. (**-ब्धार्था** *f.*) a tale, a true or probable story.

**उपलब्धिः** *f.* 1 Getting, obtaining, acquisition; उपलब्धौ यत्नः क्रियताम् Mbh. on 1. 1. 1. वृथा हि मे स्यात्स्वपदोपलब्धिः R. 5. 56, 8. 17. -2 Observation, perception, knowledge (ज्ञान); बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इत्यनर्थान्तरम् Nyāya Sūtra, नाभाव उपलब्धेः Brahma Sūtra 2. 2. 28; भावे चोपलब्धेः 2. 1. 15. cf. Nyāya S. 2. 28, 30. -3 Understanding, mind (मति). -4 A conjecture, guess. -5 Perceptibility appearance (recognized as a kind of proof by the Mīmāṁsakas); तत्र वेदविधिः स स्याज्ज्ञानं चेत्पुरुषं प्रति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उपपत्त्युपलब्धिभ्याम् Mb. 12. 238. 3. see अनुपलब्धि. **-Comp.** **-समः** ( in logic ) A kind of sophistical refutation of an argument ( *e. g.* the argument 'sound is uneternal because it is produced by some effort-' is refuted by saying that sound is also produced by wind ); Nyāyadarśana.

**उपलब्धृ** *a.* **1** Gaininig, acquiring. **-2** Knowing, perceiving. *m.* Soul, self.

**उपलम्भः** [ लभ्-घञ्-मुम् च P. VII. 4. 64 ] **1** Acquisition; अस्मादङ्गुलीयोपलम्भात्स्मृतिरुपलब्धा Ś. 7. **-2** Direct perception or recognition, comprehension otherwise than from memory ) same as अनुभव q. v. ); प्राक्तनोपलम्भ Māl. 5; ज्ञातौ सुतस्पर्शसुखोपलम्भात् R. 14. 2. **-3** Ascertaining, knowing; अविघ्नक्रियोपलम्भाय Ś. 1. **-4** Seeing, looking at ( दर्शन ); लावण्यधाम्नो भवितोपलम्भनम् Bhāg. 10. 38. 10.

**उपलम्भक** *a.* Causing to observe, reminding.

**उपलम्भनम्** Apprehension &c.

**उपलभ्य** *pot. p.* **1** Obtainable. **-2** Respectable, commendable, praise-worthy. आरम्भमिद्धौ समयोपलभ्यम् R.

**उपलिप्सा** A desire to obtain.

**उपलल्** 10 P. To fondle, coax, flatter; नताङ्गीमुपलालयन् Dk. 29; Ś. 7; M. 3.

**उपलालनम्** Fondling.

**उपलालिका** **1** Thirst. **-2** Tyranny.

**उपलिङ्गम्** A portent, natural phenomenon, considered as boding evil.

**उपलिप्** 6 P. **1** To anoint, smear, besmear. **-2** To defile, pollute; तथात्मा नोपलिप्यते Bg. 13. 32. **-3** To stick or adhere to; यो वक्त्रमुपलिम्पति Vāgb. *-Caus.* To besmear (esp. with cow-dung; शुचिं देशं विविक्तं च गोमयेनोपलेपयेत् Ms. 3. 206.

**उपलेपः** **1** Anointing, smearing. Bhāg. 11. 11. 39. **-2** Cleaning, white-washing. **-3** Obstruction, being concealed. **-4** Becoming deadened or dull ( said of senses ), bluntness, dullness.

**उपलेपनम्** **1** Smearing, anointing, plastering. **-2** An ointment, unguent.

**उपलेपिन्** **1** Serving as an ointment. **-2** Anointing, smearing. **-3** Obstructing.

**उपली** + Ā. To lie close to, cling to; Mb. 8.

**उपलेखः** N. of a grammatical work connected with the Prātiśākhyas. **-Comp.** **-पञ्जिका** *f.*, **-भाष्यम्** Names of Commentaries on the above work.

**उपलोहम्** A secondary metal.

**उपवक्तृ** *m.* **1** A priest at a sacrifice **-2** One who animates ( by his words ).

**उपवञ्चनम्** The act of crouching or lying close to.

**उपवञ्चित** *a.* Deceived, disappointed; वयं खलु हता राम यत्त्वया उपवञ्चिताः Rām. 2. 52. 19.

**उपवटः** The tree Buchanania Latifolia ( प्रियासाल ).

**उपवद्** 1 Ā. **1** To talk over, conciliate. **-2** To flatter, cajole, coax; भृत्यानुपवदते Sk.; दानारम् Bk. 8. 28.

**उपवादः** Censure, blame ( Ved. ).

**उपवादिन्** *a.* Censuring, blaming; अल्पाः कलहिनः पिशुना उपवादिनः Ch. Up. 7. 6. 1.

**उपवनम्** [ उपमितं वनेन ] A garden, grave, a planted forest; पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नैः Me. 23; R. 8. 73. 13. 79; °लता a garden creeper. **-Comp.** **-विनोदः** N. of a work on gardening.

**उपवर्ण्** 10 P. To describe in detail; उपवर्णयेदानीं कुसुमपुरवृत्तान्तम् Mu. 1.

**उपवर्णः** Minute or detailed description.

**उपवर्णनम्** Minute description, delineation in detail; अतिशयोपवर्णनं व्याख्यानम् Suśr.; Y. 1. 320.

**उपवर्षः** N. of a son of Śaṅkara Svāmin, author of several writings on the Mīmāṁsā philosophy.

**उपवल्गित** *a.* Swollen or dimmed with tears ( as eyes ).

**उपवल्लिका** N. of a plant ( अमृतस्रवा ).

**उपवल्हः** Ved. Emulation, rivalry.

**उपवस्** 1 P. **1** To dwell in or at, inhabit ( with acc. ); तपःश्रद्धे ये ह्युपवसन्त्यरण्ये Mund. Up. 1. 2. 11. वैकुण्ठं उपवसति Sk. **-2** To be in a state of abstinence, abstain from food, fast; उपवसेद्दिनम् Ms. 2. 220, 5. 20; Y. 3. 202, 64; ( fig. also ); उपोषिताभ्यामिव नेत्राभ्यां पिबन्ती Dk. 4. **-3** To go to ( a master ). **-4** To enter upon, learn, take to, begin. *-Caus.* To cause to fast.

**उपवसथः** [ उप-वस्-आधारे अथ ] **1** A village. **-2** The day preceding a Soma sacrifice; or a day of preparation for this sacrifice; a fast-day.

**उपवसथीय, उपवसथ्य** *a.* Selected for an उपवसथ ( as a day ).

**उपवस्तम्** A fast.

**उपवसनम्** A fast, fasting. **-2** The state of being near.

**उपवस्तिः** *f.* Support of life ( as food, sleep &c. ).

**उपवस्तृ** *a.* One who fasts.

**उपवास** *a.* Staying near; तेषूपवासान्विबुधानुपोष्य Mb. 3. 118. 14. **-सः** **1** A fast; सोपवासस्त्र्यहं वसेत् Y. 1. 175, 3. 190; Ms. 11. 196 ( a fast is a religious act and consists in abstaining from every kind of sensual gratification ). **-2** Kindling a sacred fire. **-3** A fire-altar.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**उपवासक** *a.* Fasting, observing a fast. **-कम्** A fast.

**उपवासिन्** *a.* Fasting. दिनोपवासी तु निशामिषाशी जटाधरः सन् कुलटाभिलाषी । हास्यार्णवः.

**उपोषणम्** A fast, fasting; नास्ति स्त्रीणां पृथग् यज्ञो न व्रतं नाप्युपोषणम् Ms. 3. 155.

**उपोषित** *a.* One who has fasted. **-तम्** A fast, fasting.

**उपवह्** 1 P. 1 To bear or lead near, lead towards. -2 To bring about, commence. -3 To gather together; कृत्स्नगोधनमुपोह्य दिनान्ते Bhāg. 10. 35. 22.

**उपोढ** *p. p.* 1 Collected, accumulated, increased, stored up; उपोढतपसाम् Ś. 5. 7; °बलस्य ते M. 5. 1; V. 2. 7; so °मदः, °हर्षः &c. -2 Brought near, proximate, near; उपोढकल्याणफलोऽभिरक्षन् Ki. 17. 51, 13. 23. -3 Arrayed for battle (as an army). -4 Begun, commenced; तदुपोढं महद्युद्धमन्योन्यवधकाङ्क्षिणोः Rām. 6. 106. 18. उपोढशब्दा न रथाङ्गनेमयः Ś. 7. 10 causing sound. -5 Married. -6 A battle-array. **-ढा** A second, favourite wife; cf. वावाता in Rām. 1. 14. 35.

**उपवहम्** Ved. Anything placed on the neck of an ox under the yoke, to raise it to the right level for a yoke-fellow of greater height; M. W. cf. Śat. Br. 1. 4. 4. 7.

**उपवहनम्** (In music) Preliminary singing, humming a tune before beginning to sing it aloud; M. 2.

**उपवाहनम्** Carrying to, bringing near; कृतकृत्यं तदात्मानं मेने तस्योपवाहनात् Rām. 1. 11. 29.

**उपवाहिन्** *a.* Flowing towards.

**उपवाह्यः, -ह्या** 1 A king's riding elephant (male or female); चन्द्रगुप्तोपवाह्यां गजवशाम् Mu. 2. -2 A royal vehicle (in general); देवोपवाह्यमक्षय्यं सदा दृष्टिमनःसुखम् Rām. 7. 15. 38.

**उपवा** Ved. Blowing at; वातस्य प्रवामुपवामनु वात्यर्चिः Av. 12. 1. 51.

**उपवाकः** 1 Addressing, speaking to, conversing. -2 Praising. -3 Indra-grain (इन्द्रयव).

**उपवाजनम्** A fan.

**उपवासनम्** A dress, garment (Ved.); यावतीः कृत्याः उपवासने Av. 14. 2. 49.

**उपविचारः** Environs, neighbourhood.

**उपविद्** *a.* 1 Gaining, obtaining. -2 Knowing. *-f.* 1 Acquisition. -2 Investigating, inquiring into, knowledge, practical knowledge.

**उपविद्या** 1 Profane science, inferior kind of knowledge. -2 Practical knowledge.

**उपवेदः** 'Inferior knowledge', a class of writings subordinate to the Vedas. There are four such *Upavedas*, one being attached to each of the four Vedas:— thus आयुर्वेद or Medicine to ऋग्वेद; (according to some authorities such as Suśruta it is a part of the Atharvaveda); धनुर्वेद or military science to यजुर्वेद; गान्धर्ववेद or Music to सामवेद, and स्थापत्य-शास्त्र-वेद or Architecture to अथर्ववेद.

**उपविश्** 6 P. 1 To sit down, take a seat; एवमुक्त्वाऽर्जुनः संख्ये रथोपस्थ उपाविशत् Bg. 1. 47. -2 To sit near to, wait upon. -3 To pitch a camp, encamp. -4 To go down, set (as the sun). -5 To enter upon, practise; as प्रायम् उपविशति; so अनशनोपविष्ट. -6 To abstain from food, fast; सोऽप्युक्त्वैवमुपाविशत् Bk. 7. 75. -7 To seize, take possession of. *-Caus.* To cause to sit down, place or set down.

**उपविष्ट** *a.* 1 Seated, come to, arrived. -2 Occupied with, engaged. **-क** *a.* Firmly settled (said of a foetus which remains in the womb beyond the usual time).

**उपवेशः,-शनम्** 1 Sitting, sitting down; as in प्रायोपवेशन. -2 Directing one's mind to, being attached to. -3 Voiding by stool. -4 Placing down. -5 Surrendering; सागरस्योपवेशनम् Rām. 6. 19. 33.

**उपवेशिन्** *a.* 1 Sitting. -2 Devoting oneself to.

**उपविश्रम्भय्य** *ind.* Having inspired with confidence; वैश्रम्भकैरुपसृतानुपविश्रम्भय्य Bhāg. 5. 26. 32.

**उपवेष्टृ** *a.* One who sits, sitting down.

**उपविषः -षम्** 1 An artificial poison. -2 A narcotic, any poisonous drug; अर्कक्षीरं स्नुहीक्षीरं तथैव कलिहारिका । धत्तूरः करवीरश्च पञ्च चोपविषाः स्मृताः ॥ **-षा** N. of a plant (अतिविषा) It is a plant used in medicine. The bark is employed in dying. It is white, red and black (Atis or Betula). It is also referred to as उपविषाणिका.

**उपवीक्ष्** [उप-वि-ईक्ष्] Ā. 1 To look at or towards. -2 To regard as fit or proper.

**उपवीणयति** Den. P. [P. III. 1. 25] To play on the Vīṇā or lute (before a deity &c.); उपवीणयितुं ययौ रवेरुदयावृत्तिपथेन नारदः R. 8. 33; N. 6. 65; K. 131.

**उपवीणितम्** Singing on a lute; श्रुतिसुखमुपवीणितं सहायैः Ki. 10. 38.

**उपवीतम्** [उप-वे-क्त] 1 Investiture with the sacred thread. -2 The sacred thread worn by the first three classes of the Hindus; पित्र्यमंशमुपवीतलक्षणं मातृकं च धनुरूर्जितं दधत् R. 11. 64; मुक्तायज्ञोपवीतानि Ku. 6. 6; Śi. 1. 7; Ki. 12. 23; Ms. 2. 44, 64, 4. 36, 66.

**उपवीतकम्** The sacred thread.

**उपवीतिन्** *a.* Wearing the sacred thread. उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः Ms. 2. 63.

**उपवीरम्** A kind of demon.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**उपवृंह, -हणम्** &c. See उपबृंह् &c.

**उपवृत्** 1 Ā. 1 To go towards, approach. -2 To return.

**उपवर्तः** A particular high number.

**उपवर्तनम्** 1 A place for exercise. -2 A place whether inhabited or not. -3 A district or *Pargaṇā*. -4 A kingdom (राज्य) उपवर्तनमाहर्तुमुद्यतोऽस्म्यहमञ्जसा Śiva. B. 31. 11. -5 A bog, marshy place.

**उपवृत्तिः** Motion towards, approaching.

**उपवेद** See under उपविद्.

**उपवेषः** Ved. A stick (of green wood) used for stirring the sacrificial fire; स उपवेषमादत्ते Śat. Br.

**उपवैणवम्** The three periods of the day; *i. e.* morning, midday, and evening (त्रिसंध्यम्).

**उपव्याख्यानम्** A supplementary explanation or interpretation; तस्योपव्याख्यानम् Ch. Up. 1. 1. 1.

**उपव्याघ्रः** A small hunting leopard.

**उपव्रजम्** *ind.* Near a cattle pen.

**उपशक्** 4 U. 1 To endeavour, help, serve. -2 To learn, enquire into. -3 5. P. To be able.

**उपशम्** 4. P. 1 To become calm or quiet, be assuaged; उपशाम्यतु ते बुद्धिः Bk. 20. 5. -2 To cease, stop; अग्निः, शब्दः, कोपः &c.; cease to speak; K. 110. -*Caus.* 1 To calm, tranquillize. -2 To appease, pacify, assuage, mitigate. -3 To extinguish, kill.

